कर्नाटकप्रशासनम्

# संस्कृतरश्मिः-४

## तृतीयभाषा - संस्कृतम्

## नवमी कक्ष्या

(Revised)

9

# SAMSKRITHA RASHMI - 4

## NINTH STANDARD

## THIRD LANGUAGE - SANSKRIT

©KTBS Not to be republished

KARNATAKA TEXTBOOK SOCIETY (R)
100 Feet Ring Road, Banashankari 3rd stage,
Bengaluru- 560 085.

# Preface

The Textbook Society, Karnataka has been engaged in producing new textbooks according to the new syllabi which in turn are designed on NCF - 2005 since June 2010. Textbooks are prepared in 12 languages; seven of them serve as the media of instruction. From standard 1 to 4 there is the EVS, mathematics and 5th to 10th there are three core subjects namely mathematics, science and social science.

NCF - 2005 has a number of special features and they are :

- connecting knowledge to life activities
- learning to shift from rote methods
- enriching the curriculum beyond textbooks
- learning experiences for the construction of knowledge
- making examinations flexible and integrating them with classroom experiences
- caring concerns within the democratic policy of the country
- making education relevant to the present and future needs.
- softening the subject boundaries-integrated knowledge and the joy of learning
- Making the child is the constructor of knowledge

The new books are produced based on three fundamental approaches namely,

Constructive approach, Spiral Approach and Integrated approach.

The learner is encouraged to think, engage in activities, master skills and competencies. The materials presented in these books are integrated with values. The new books are not examination oriented in their nature. On the other hand they help the learner in the all round development of his/her personality, thus help him/her become a healthy member of a healthy society and a productive citizen of this great country, India.

The most important objectives of teaching language are listening, speaking, reading, writing and reference work. These skills have been given a lot of importance in all the language textbooks. along with the inculcation of these skills, fundamental grammar, opportunities for learners to appreciate beauty and imbibe universal life values have been integrated in language textbooks. When learners master these competencies, they would stop studying textbooks for the sake of passing examinations. In order to help learners master these competencies, a number of paired and group activities, assignments and project work have been included in the textbooks. It is expected that these activities would help learner master communicative skills. Ultimately, it is expected that students master the art of learning to learn and make use of these competencies in real life.

The Textbook Society expresses grateful thanks to the chairpersons, writers, scrutinisers, artists, staff of DIETs and CTEs and the members of the Editorial Board and printers in helping the Text Book Society in producing these textbooks. A few works of some writers and poets have been included in these textbooks. The textbook society is extremely grateful to them for giving their consent for the inclusion of these pieces in the textbooks.

©KTBS Not to be republished

**Prof. G S Mudambadithaya**
Co-ordinator
Curriculum Revision and
Textbook Preparation
Karnataka Textbook Society®, Bengaluru.

**Nagendra Kumar**
Managing Director
Karnataka Textbook Society®
Bengaluru.

॥ श्रीः ॥

# प्राक्कथनम्

संस्कृतं नाम दैवी वाक् इतीयं प्राचीनोक्तिः । संस्कृतं नाम सर्वोपयोगि, संस्कारमूलं, जागतीकरणकालेऽपि विराजमानं रत्नमिति इदानीन्तनेषु दिनेषु शिक्षणतज्ज्ञाः अभिप्रयन्ति । भारतस्य हृदयं संस्कृतमिति, भारतस्य सर्वोच्चन्यायालयस्य निर्णये कथितमस्ति ।

पञ्चमकक्ष्यातः दशमकक्ष्यापर्यन्तं संस्कृताभ्यासः अवश्यं करणीयः इति केन्द्रीयशिक्षामन्त्रिणा मोहम्मद् करीम् भाई छाग्ला महोदयेन संसदि उक्तमासीदित्ययम् इदानीम् इतिहासः । अतः भारतीयैः सर्वैः संस्कृतम् अवश्यं ज्ञातव्यम् । ज्ञाते संस्कृते अन्यभाषाणां ज्ञानं वर्धते इत्ययम् अनुभववेद्यः ।

नवमकक्ष्यार्थं पुस्तकमिदं सज्जीकृतम् । संस्कृताभ्यासेन उच्चारणसामर्थ्यं वर्धते। भारतीयसंस्कृतेश्च परिचयः भवति ।

राष्ट्रियपठ्यक्रमनियमानुगुणं (NCF-2005) पठ्यपुस्तकमिदं रचितम् । पठ्यपुस्तकस्य अभ्यासेन छात्राः संस्कृतस्य प्राथमिकज्ञानं प्राप्य सन्तुष्येयुः।

पुस्तकलेखने कृतसहायेभ्यः पाठ्यपुस्तकसङ्घस्य अधिकारिभ्यः, समितिसदस्येभ्यः, चित्रकाराय, मुद्रकाय च कृतज्ञताः समर्प्यन्ते ।

**वि॥ टि. एन्. प्रभाकरः**
अध्यक्षः
पठ्यपुस्तकरचनासमितिः

## अध्यापकेभ्यः सूचनाः

- अवधेयांशाः, क्रियाकलापः इति विभागतः परीक्षायां प्रश्नाः न भवेयुः ।
- पूरकपाठेभ्यः दीर्घोत्तरप्रशनाः एव परीक्षायां भवेयुः।
- आकरग्रन्थाः अवश्यं परिशीलनीयाः ।
- गद्यपाठान्तर्गताः कण्ठपाठार्थं निर्दिष्टाश्च श्लोकाः तात्पर्यलेखनार्थं प्रश्नरूपेण न भवेयुः।
- पाठ्यपुस्तकस्यादौ दत्तं स्तोत्रं छात्राणां गानार्थमेव न तु परीक्षार्थम्।

Not to be republished ©KTBS

# पठ्यपुस्तकरचनासमितिः

**अध्यक्षः**

**श्री टि. एन्. प्रभाकरः**, निर्देशकः, महाविद्यालयशिक्षणविभागः, विनोबा मार्गः, मैसूरु ।

**सदस्याः**

**विद्वान् कमलाकरः भट्टः**, संस्कृताध्यापकः, श्रीमारिकाम्बासर्वकारीयप्रौढशाला, शिरसि ।

**विद्वान् देवरु भट्टः**, संस्कृताध्यापकः, आर्.वि. बालिकाप्रौढशाला जयनगरम्, बेङ्गलूरु ।

**विद्वान् जि. एम्. गुरुमूर्तिः**, पदवीपूर्वविद्यालयः, मल्लाडिहल्ली, होलल्केरे तालूक्, चित्रदुर्गम् ।

**विद्वान् अनन्त हेब्बार**, मुख्यशिक्षकः, श्री. अ. रा. स. पदविपूर्वविद्यालयः, कोप्प, चिक्कमगलूरु।

**विद्वान् लक्ष्मीनारायणवर्णः**, श्री रामकुञ्जेश्वरपदविपूर्वविद्यालयः, रामकुञ्ज पूत्तूरु द.क.।

**श्री गुल्जार, चित्रकलाशिक्षकः**, सर्वकारीयप्रौढशाला, दोड्डशिवार, मालूर् तालूक्, कोलार ।

**परिशीलकः**

**विद्वान् रामाचन्द्रः भट्टः**, प्राचार्यः, श्री श्रीमातासंस्कृतमहाविद्यालयः उम्मचगि, यल्लापुरम्, उत्तरकन्नडम् ।

**सम्पादकः**

**डा. कोटेमने रामचन्द्र भट्टः**, निर्देशकः, वेदविज्ञानशोधसंस्थानम्, बेङ्गलूरु ।

**प्रमुखसंयोजकः**

**प्रो. जि.एस्. मुडम्बडित्तायः**, क.प.पु.सङ्घः रि, बेङ्गलूरु ।

**मार्गदर्शकौ**

**श्रीमान् नागेन्द्रकुमारः**, व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः रि, बेङ्गलूरु ।

**श्रीमती सि. नागमणी**, उपनिदेशकः (प्रभारि), क.प.पु.सङ्घः रि, बेङ्गलूरु।

**संयोजिका**

**श्रीमती एस्. एन्. लीलावती**, ज्येष्ठसहायकनिर्देशिका, क.प.पु.सङ्घः रि, बेङ्गलूरु ।

©KTBS Not to be republished

# About the Revision of Textbooks

Honourable Chief Minister Sri Siddaramaiah who is also the Finance Minister of Karnataka, in his response to the public opinion about the new textbooks from standard I to X, announced, in his 2014-15 budget speech of constituting an expert-committee, to look into the matter. He also spoke of the basic expectations there in, which the textbook experts should follow: “The textbooks should aim at inculcating social equality, moral values, development of personality, scientific temper, critical acumen, secularism and the sense of national commitment”, he said.

Later, for the revision of the textbooks from class I to X, the Department of Education constituted twenty seven committees and passed an order on 24-11-2014. The committees so constituted were subject and class-wise and were in accordance with the standards prescribed. Teachers who are experts in matters of subjects and syllabi were in the committees.

There were already many complaints, and analyses about the textbooks. So, a freehand was given in the order dated 24-11-2014 to the responsible committees to examine and review text and even to prepare new text and revise if necessary. Eventually, a new order was passed on 19-9-2015 which also gave freedom even to re-write the textbooks if necessary. In the same order, it was said that the completely revised textbooks could be put to force from 2017-18 instead of 2016-17.

Many self inspired individuals and institutions, listing out the wrong information and mistakes there in the text, had sent them to the Education Minister and to the Textbook Society. They were rectified. Before rectification we had exchanged ideas by arranging debates. Discussions had taken place with Primary and Secondary Education Teachers’ Associations. Questionnaires were administered among teachers to pool up opinions. Separate meetings were held with teachers, subject inspectors and DIET Principals. Analytical opinions had been collected. To the subject experts of science, social science, mathematics and languages, textbooks were sent in advance and later meetings were held for discussions. Women associations and science related organisations were also invited for discussions. Thus, on the basis of inputs received from various sources, the textbooks have been revised where ever necessary.

©KTBS Not to be republished

Another important aspect has to be shared here. We constituted three expert committees. They were constituted to make suggestions after making a comparative study of the texts of science, mathematics and social science subjects of central schools (NCERT), along with state textbooks. Thus, the state text books have been enriched based on the comparative analysis and suggestions made by the experts. The state textbooks have been guarded not to go lower in standards than the textbooks of central schools. Besides, these textbooks have been examined along side with the textbooks of Andhra Pradesh, Kerala, Tamil Nadu and Maharashtra states.

Another clarification has to be given here. Whatever we have done in the committees is only revision, it is not the total preparation of the textbooks. Therefore, the structure of the already prepared textbooks have in no way been affected or distorted. They have only been revised in the background of gender equality, regional representation, national integrity, equality and social harmony. While doing so, the curriculum frames of both central and state have not been transgressed. Besides, the aspirations of the constitution are incorporated carefully. Further, the reviews of the committees were once given to higher expert committees for examination and their opinions have been inculcated into the textbooks.

Finally, we express our grateful thanks to those who strived in all those 27 committees with complete dedication and also to those who served in higher committees. At the same time, we thank all the supervising officers of the Textbook Society, who sincerely worked hard in forming the committees and managed to see the task reach its logical completion. We thank all the members of the staff who co-operated in this venture. Our thanks are also to the subject experts and to the associations who gave valuable suggestions.

**Narasimhaiah**
Mangaging Director
Karnataka Textbook Society
Bengaluru.

**Prof. Baraguru Ramachandrappa**
Chairman-in-Chief
State Textbook Revision Committee
Bengaluru.

©KTBS Not to be republished

## परिष्करणासमितिः

१. **प्रो. बरगूरु रामचन्द्रप्पः,** सर्वाध्यक्षः, राज्यपठ्यपुस्तकपरिष्करणसमितिः, बेंगळूरु।

२. **श्री. के.एल्. ज्ञानप्रसाद् राव्,** अध्यक्षः, पठ्यपुस्तकपरिष्करणसमितिः, संस्कृत उपन्यासकः, विद्यावर्धक सङ्घ ज्यूनियर् कालेज्, राजाजिनगर, बेंगळूरु।

**सदस्याः**

१. **श्री श्रीधरभट् ऐनकै,** निर्देशकः, वेद्यतभारति शिक्षण संस्था, के.आर्. नगर, मैसूरु जिल्ला।

२. **डा. संतोष् हानगल्,** संस्कृत प्राध्यापकः, संस्कृत विश्वविद्यालय (के.एस्.यु) बेंगळूरु।

३. **डा. एस्. प्रभुलिङ्ग देवरु,** प्रभारि प्राध्यापकः, सर्कारी श्री चामराज्नेद्र संस्कृत कालेज्, बेंगळूरु।

४. **श्रीमती सुमङ्गला हेगडे,** संस्कृत शिक्षकी, सर्कारि बलिका प.पू. कालेज्, १३ क्रास्, मल्लेश्वरं , बेंगळूरु।

५. **श्री हजरत् अली. यु,** उपन्यासकः, ललित कला विभाग. तुमकूरु विश्व विद्यालय, तुमकूरु।

## परिष्करणोन्नतसमितिः

१. **डा. एच्.वि.वेणुगोपालः,** निवृत्त प्रांशुपालः संस्कृत प्राध्यापकः, न्याषनल् कालेज् बसवनगुडि बेंगळूरु।

२. **डा. जे.श्रीनिवासमूर्तिः,** निवृत्त प्रांशुपालः एं.इ.एस्.कालेज्, मल्लेश्वरं, बेंगळूरु।

**प्रमुखमार्गदर्शकौ-**

**श्री नरसिंहय्यः,** व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

**श्रीमती सि. नागमणी,** उपनिर्देशिका, क.प.पु. संघः (रि) बेङ्गलूरु।

**संयोजिका**

**श्रीमती एस्.एन्.लीलावती,** ज्योष्ठ सहायकनिर्देशिका, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

©KTBS Not to be republished

# पाठानुक्रमणिका


| क्र.सं. | पाठः | पृष्ठसंङ्ख्या |
|---|---|---|
| ०१. | स्तुतिवल्लरी - पद्यम् - कण्ठपाठार्थम् | १ |
| ०२. | आहारस्य महत्त्वम् - गद्यम् - सम्भाषणम् | ५ |
| ०३. | सन्धिः - व्याकरणाम् | ११ |
| ०४. | भारतमहिमा - पद्यम् - प्राचीनम् | १७ |
| ०५. | क्रियापदम् - व्याकरणम् | २१ |
| ०६. | प्रवासक्षेत्राणि - गद्यम् - क्षेत्रपरिचयः | २७ |
| ०७ | प्रयोगाः - व्याकरणम् - | ३३ |
| ०८. | कर्नाटककालिदासः - गद्यम् - आधुनिकम् | ३८ |
| ०९. | केन वा मैत्री - गद्यम् - कथा | ४२ |
| १०. | सूक्तिमन्दाकिनी - पद्यम् - कण्ठपाठार्थम् | ४८ |
| ११. | समासः - व्याकरणम् | ५१ |
| १२. | विभूतिपुरुषः - गद्यम् - व्यक्तिपरिचयः | ५५ |
| १३. | अलङ्कारः - व्याकरणम् | ६१ |
| १४. | संस्कृतं हि जीवितम् - पद्यम् - आधुनिकम् | ६३ |
| १५. | छन्दः - व्याकरणम् | ७० |
| १६. | कवेरकन्या - चम्पूः | ७३ |
| १७. | परोपकारः कर्तव्यः - नाटकम् | ७७ |
| १८. | पत्राणि - व्याकरणम् | ८५ |
| १९. | प्रबन्धाः - व्याकरणम् | ८९ |
| २०. | अनुवादः - व्याकरणम् | ९२ |


©KTBS Not to be republished

| क्र.सं. | पूरकपाठाः | पृष्ठसंङ्ख्या |
|---|---|---|
| ०१. | देवस्तिष्ठति सर्वत्र - व्यक्तिपरिचयः | ९४ |
| ०२. | कुमार्गस्थो विनश्यति - कथा | ९६ |
| ०३. | गद्यावगाहनम् | ९८ |
| ०४. | चित्रकथा | ९९ |
| ०५. | आकरग्रन्थाः | १०१ |


# मासिकपाठयोजना

| मासाः | पाठाः | | |
|---|---|---|---|
| **जून्** | सेतुपाठः। | स्तुतिवल्लरी । | आहारस्य महत्वम् । |
| **जुलै** | सन्धिः। | भारतमहिमा । | क्रियापदम् । |
| **आगस्ट्** | प्रवासक्षेत्राणि । | प्रयोगाः । | कर्नाटककालिदासः । |
| **सेप्टम्बर्** | केन वा मैत्री। | सूक्तिमन्दाकिनी । | देवस्तिष्ठति सर्वत्र । |
| **अक्टोबर्** | प्रबन्धः। | अनुवादः। | कुमार्गस्थो विनश्यति। |
| **नवेम्बर्** | समासः। | विभूतिपुरुषः। | संस्कृतं हि जीवितम् । |
| **डिसेम्बर्** | अलङ्कारः। | कवेरकन्या । | |
| **जनवरी** | छन्दः । | पत्राणि। | परोपकरः कर्तव्यः। |
| **फेब्रवरी** | चित्रकथा । | गद्यावगाहनम् । | |
| **मार्च्** | पुनरावर्तनम् । | | |

©KTBS Not to be republished

# गुर्वष्टकम्

शरीरं सुरूपं तथा वा कलत्रं
यशश्चारु चित्रं धनं मेरुतुल्यं ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
**ततः किं ततः किं ततः किं ततः किम् ।। १ ।।**

कलत्रं धनं पुत्रपौत्रादि सर्वं
गृहं बान्धवाः सर्वमेतद्धि जातम्।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं.... ।। २ ।।

षडङ्गादिवेदो मुखे शास्त्रविद्या
कवित्वादिगद्यं सुपद्यं करोति ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं.... ।। ३ ।।

विदेशेषु मान्यः स्वदेशेषु पूज्यः
सदाचारवृत्तेषु मत्तो न चान्यः।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं.... ।। ४ ।।

क्षमामण्डले भूपभूपालवृन्दैः
सदा सेवितं यस्य पादारविन्दं ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं.... ।। ५ ।।

यशो मे गतं दिक्षु दानप्रतापात्
जगद्वस्तु सर्वं करे यत्प्रसादात् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं.... ।। ६ ।।

न भोगे न योगे न वा वाजिराजौ
न कान्तासुखे नैव वित्तेषु चित्तम् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं.... ।। ७ ।।

अरण्ये न वा स्वस्य गेहे न कार्ये
न देहे मनो वर्तते मे त्वनर्घ्ये।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं.... ।। ८ ।।

गुरोरष्टकं यः पठेत् पुण्यदेही
यतिर्भूपतिर्ब्रह्मचारी च गेही ।
लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञं
गुरोरुक्तवाक्ये मनो यस्य लग्नम्।।

©KTBS Not to be republished

## प्रथमः पाठः

# स्तुतिवल्लरी

### कण्ठपाठः करणीयः

भारतीयाः वयं प्रार्थनां विना किमपि कार्यं न करवाम । प्रार्थनया मनसि आनन्दः सञ्जायते इति अस्माकं विश्वासः । अत्र केचन श्लोकाः प्रदत्ताः। श्रद्धया यदि प्रार्थयाम तर्हि अलौकिकानन्दम् अनुभवाम ।



©KTBS
Not to be republished

बुद्धिर्बलं यशो धैर्यं निर्भयत्वमरोगता ।
अजाड्यं वाक्पटुत्वं च हनूमत्स्मरणाद्भवेत् ।।१।।

भानो भास्कर मार्तण्ड चण्डरश्मे दिवाकर ।
आयुष्यं देहि चारोग्यं विद्यां देहि यशस्सुखम् ।।२।।

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।३।।

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ।।४।।

यस्यज्ञानदयासिन्धोरगाधस्यानघागुणाः ।
सेव्यतामक्षयो धीराः सश्रियै चामृताय च ।।५।।

रत्नाकराधौतपदां हिमालयकिरीटिनीम् ।
ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम् ।।६।।

*********

**अन्वयार्थः**

१. बुद्धिः=प्रज्ञा, बलं=सामर्थ्यं, यशः=कीर्तिः, धैर्यं=शौर्यं, निर्भयत्वं= भयरहितत्वं, अरोगता=आरोग्यं, अजाड्यम् = उत्साहः, वाक्पटुत्वं = वाक्चातुर्यं, च = एवं, हनूमत्स्मरणात्=भगवतः मारुतेः ध्यानात्, भवेत्= स्यात् ।

२. भानो= हे सूर्य, भास्कर = हे तेजस्कर, मार्तण्ड = हे आदित्य, चण्डरश्मे = हे प्रखरकिरण, दिवाकर = हे दिनकर ,आयुष्यं-दीर्घजीवनम्, आरोग्यं = अरोगतां, विद्यां= ज्ञानं, यशः= कीर्तिं, सुखम्=आनन्दं, च, देहि= प्रयच्छ।

३. वागर्थौ इव=शब्दार्थौ इव, सक्तौ=अविनाभावेन सम्मिलितौ, जगतः पितरौ=लोकस्य मातापितरौ, पार्वतीपरमेश्वरौ=उमाशङ्करौ, वागर्थप्रतिपत्तये=शब्दार्थ- अवबोधाय, वन्दे =नमामि ।

४. वसुदेवसुतम् = वसुदेवस्य पुत्रम्, कंसचाणूरमर्दनम्=कंसस्य चाणूरस्य च

©KTBS Not to be republished

हन्तारम्, देवम् =भगवन्तम्, देवकीपरमानन्दम्=देवक्याः आनन्दजनकम्, जगद्गुरुम् =जगतः स्वामिनम्, कृष्णं वन्दे= वासुदेवं नमामि ।

५. हे धीराः = हे पण्डिताः ज्ञानदयासिन्धोः = ज्ञनकृपासमुद्रस्य अगाधस्य = गम्भीरस्य यस्य अनधागुणाः =पापरहिताः गुणाः अक्षमः नाशरहितः सः = देवः श्रियै = सम्पदे अमृताय = मोक्षाय च (भवद्भिः) सेष्यताम् = आश्रयताम्।

६. रत्नाकराधौतपदां=समुद्रेण प्रक्षालितपादयुग्मम्, हिमालयकिरीटिनीम् =हिमालयपर्वत एव मुकुटप्रायाम्, ब्रह्मराजर्षिरत्नाढ्यां=श्रेष्ठराजाः, महर्षयः एव रत्नानि, तैः भूषिताम् भारतमातरम्=भारतजननीम्, वन्दे=नमामि ।

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. वाक्पटुत्वं कस्मात् भवति ?
२. जगतः पितरौ कौ ?
३. हिमालयकिरीटिनी का ?
४. वसुदेवसुतः कः ?
५. दिवाकरः कः ?

२. **संयोज्य लिखत ।**

| अ | आ |
|---|---|
| बुद्धिः | रत्नाकराधौतपदाम् |
| सम्पृक्तौ | दिवाकरः |
| भारतमाता | हनूमतः |
| चण्डरश्मिः | पार्वतीपरमेश्वरौ |

©KTBS Not to be republished

## ३. समानार्थकपदानि लिखत ।

१. बलम्　　　　२. बुद्धिः

३. गुरुः　　　　४. सूर्यः

## ४. वाक्यं रचयत ।

१. स्मरणात्

२. विद्याम्

३. वन्दे

४. जगतः

## ५. द्वित्रैः वाक्यैः उत्तरं लिखत ।

१. हनूमतः स्मरणात् किं किं भवति ?

२. भारतमाता कथं वर्तते ?

३. जगद्गुरुः श्रीकृष्णः कीदृशः ?

४. ज्ञानं किमर्थं सेव्यते ?

©KTBS Not to be republished

### क्रियाकलापः

मञ्जूषातः अक्षरं चित्वा रिक्तस्थानं पूरयत ।

| |
|---|
| ती, रः, च, णा, रा, य, र, घ्ने, रा, र्तिः |

१. वि ___ श्व___।

२. ना ___ ___ णः।

३. स ___ स्व ___ ।

४. दक्षि ___ मू ___।

५. श्री ___ म ___न्द्रः।

## द्वितीयः पाठः

# आहारस्य महत्त्वम्

यादृशं भक्षयेदन्नं बुद्धिः भवति तादृशी इति प्राचीनोक्तिः। अतः आहारस्वीकारे मानवैः केचन नियमाः अनुसरणीयाः इति ज्ञायते । अतः सर्वदा एतान् नियमान् सर्वे जानन्तु, अपि च संस्कृतेन सम्भाषणकौशलम् अवगच्छन्तु इति धिया अयं पाठः अत्र समायोजितः ।

**(अध्यापकः कक्ष्यां प्रविशति । छात्राः उत्थाय नमस्कुर्वन्ति ।)**

छात्राः - नमस्ते आचार्य! सुप्रभातम् ।

आचार्यः - सुप्रभातम् । उपविशन्तु । अद्य अक्टोबर मासस्य षोडशदिनाङ्कः ।

शङ्करः - आचार्य ! अद्य विश्व-आहारदिनम् इति सर्वत्र आचरन्ति। किमर्थम् आचरन्ति ? कृपया वदतु ।

आचार्यः - पश्यतु शङ्कर ! इदं शरीरम् आहारेण सम्पाल्यते । शरीरमाद्यं खलु धर्मसाधनम्। अतः सर्वोऽपि व्यवहारः शरीरसाध्यः । शरीरञ्च आहारेण वर्धते इति कारणतः जगति सर्वेऽपि जनाः आहारं विन्दन्तु। आहाराभावेन जनाः मृताः न भवन्तु, अपि च सर्वेऽपि आहारस्य महत्त्वं जानन्तु इत्येव अस्य आचरणस्य उद्देशः।

ललिता - आहारस्य महत्त्वमुद्दिश्य अधिकं वदतु आचार्य ।

आचार्यः - आहारः व्यर्थो मा भूत् । यथावश्यकं तथा परीक्ष्य खादतु । हितभुक्, मितभुक्, ऋतुभुक्, अरुक् भवति इति आयुर्वेदविज्ञानी वाग्भटः वदति।

डिसोज - गुरुवर्य! अस्य वाक्यस्य अर्थः कः?

©KTBS Not to be republished

आचार्यः - हिताहारं यः खादति सः हितभुक् भवति । सत्त्वगुणयुतः आहारः एव हितकरः भवति । मानवस्य शरीरं वातपित्थकफयुक्तम् अस्ति। अहितकराहारसेवनेन एषां विकारो भवति । अतः अनेकविधेषु आहारेषु सत्त्वगुणोपेतः हितकरः आहारः एव सेवनीयः ।









©KTBS Not to be republished

ऋचीकः - गुरो ! तर्हि आहारः कतिविधः ? तस्य विभागाः के ?

आचार्यः - आहारेषु सत्त्वरजस्तमोगुणयुक्ताः इति त्रयः विभागाः सन्ति यः आहारः द्वेषासूयादिदुर्गुणान् दूरीकृत्य आयुर्ज्ञानारोग्यसुखादिकं वर्धयति सः सात्विकः आहारः । यः आहारः लवणाम्लकादियुतः कामक्रोधादिगुणान् वर्धयति सः रजोगुणयुक्तः। एवमेव प्रदूषितः दुर्गन्धयुतः रसहीनः द्वेषासूयादिदुर्गुणजनकः आहारः तमोगुणयुक्तः भवति।

नफीसा - आचार्य ! सत्त्वगुणयुक्ताः आहाराः के ? कृपया वदतु ।

आचार्यः - मधुराः अभिनवाः दधि तक्रं क्षीरं शाकानि हरितानि पर्णानि च

सत्त्वगुणयुक्ताः आहाराः । एते हितकराः। भवन्ति । एतान् यः खादति सः हितभुक् भवति।

शङ्करः - आचार्य ! अहमपि हितभुक् भवितुम् इच्छामि । कृपया 'मितभुक् ऋतुभुक् अरुक्' इत्यस्यापि अर्थं कथयतु।

आचार्यः - आहारसेवने परिमितिः भवेत् । आहारः लब्धः इति अधिकं न खादेत्। अधिकाहारसेवनेन शरीरे आमवर्धनेन बहवः रोगाः सम्भवन्ति। अतः मिताहारः सेवनीयः । यः मिताहारं सः मितभुक् भवति । तथैव द्वादशमासेषु षट् ऋतवः भवन्ति । ऋतूणाम् अनुसारेण कालानुगुणः आहारः आयुर्वेदे कथितः । तेषां सेवनेन कालव्यत्ययेन जायमानः ज्वरादिरोगाः न भवन्ति । अतः कालमनुसृत्य योग्यम् आहारं यः स्वीकरोति सः ऋतुभुक् भवति। वाक्यस्य सारस्तु यः हितं मितं कालानुगुणं च आहारं खादति सः सर्वदा रोगरहितः दृढकायश्च भवति।

ऋचीकः - आर्य ! उत्तमारोग्याय प्रतिदिनं क्षीरं घृतं तक्रं च सेवनीयम् इति मम माता वदति । सत्यं वा तत्?

आचार्यः - बाल ! सुष्ठु पृष्टं भवता । क्षीरं तु अमृतसमानं भवति । क्षीरेण विना मानवजीवनं दुष्करम् । घृतं देहं वर्धयति । तक्रं तु भोजनान्ते हितं जनयति ।

दीपिका - कीदृशाः आहाराः बुद्धिं विकासयन्ति?

आचार्यः - पिष्टादिजीवसत्वयुताः आहाराः, क्षीरम्, अभिनवानि फलानि, ब्राह्मी, समुद्रलवणं चेत्यादयः देहबुद्धिमनोविकासं कुर्वन्ति ।

डिसोजा - आर्य ! अद्यतनदिनेषु अस्माकम् आहारसेवनक्रमेषु दोषाः सन्ति किल?

आचार्यः - आम् । मार्गस्य पार्श्वे सज्जीकृतान् आहारान् न खादेत् । दूरदर्शनं

©KTBS Not to be republished

पश्यन्तः वार्तालापं कुर्वन्तः त्वरया असमये वा न भक्षयेत् । आहारे अवधानं दत्त्वा खादेत् । भवन्तः एवं दोषं न कुर्वन्तु। मया उक्तरीत्या आहारं स्वीकुर्वन्तु।

सर्वे - आम् । आचार्य ! वयं । हितं मितं कालानुगुणं च आहारं खादित्वा रोगरहिताः भवेम।

आचार्यः - तथैव कृत्वा अरोगिणो भवन्तु । देवः अनुगृह्णातु भवतः सर्वान् । सर्वेषां शुभं भवतु सर्वदा।

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत ।

१. अक्टोबर् षोडशे दिनाङ्के सर्वत्र किम् आचरन्ति ?

२. शरीरं केन सम्पाल्यते ?

३. मानवस्य शरीरं किं युक्तमस्ति ?

४. आहारेषु कति विभागाः सन्ति ?

५. वयं कथं रोगरहिताः भवेम ?

### २. रिक्तस्थानं पूरयत ।

१. शरीरमाद्यं खलु ______________________ ।

२. आहाराभावेन जनाः ______________________ न भवन्तु ।

३. क्षीरं तु ______________________ भवति ।

४. आहारे ______________________ दत्वा खादेत् ।

५. सर्वेषां ______________________ भवतु सर्वदा ।

### ३. लघूत्तरं लिखत ।

१. सत्त्वगुणयुक्ताः आहाराः के ?

२. मितभुक् इत्यस्य अर्थः कः ?

३. कीदृशाः आहाराः अस्माकं बुद्धिं विकासयन्ति ?

©KTBS Not to be republished

## ४. समानार्थकं पदं लिखत ।

१. जनाः  २. विन्दन्तु  ३. शरीरम्  ४. बुद्धिः

## ५. विरुद्धार्थकपदं लिखत ।

१. हितकरः  २. गुणः  ३. परिमितिः  ४. अमृतम्

## ६. यथानिर्देशम् उत्तरं लिखत ।

१. आहारस्य महत्वमुद्दिश्य अधिकं वदतु आचार्य ।

कः पाठः ?  का वदति ?  कं वदति ?

२. सत्त्वगुणयुक्ताः आहाराः के? कृपया वदतु ।

कः पाठः ?  का वदति ?  कं वदति ?

३. त्वरया असमये वा न भक्षयेत्।

कः पाठः ?  कः वदति ?  कान् वदति ?

## ७. दशभिः वाक्यैः कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

१. सत्त्वरजस्तमोगुणयुक्तानाम् आहाराणां विषये लिखत ।

२. आहारस्वीकारसमये के नियमाः पालनीयाः ?



Not to be republished ©KTBS

## क्रियाकलापः

* **अधोलिखितानां धातूनां लट्-लोट्लकारयोः रूपं लिखत ।**

| | धातुः | लट्लकारः | लोट्लकारः |
|---|---|---|---|
| उदाहरणम् - | पठ् | पठति | पठतु |
| | वस् | ______ | ______ |
| | वद् | ______ | ______ |
| | लिख् | ______ | ______ |
| | व्रज | ______ | ______ |
| | खाद् | ______ | ______ |
| | भू | ______ | ______ |
| | डुकृञ् | ______ | ______ |
| | गम् | ______ | ______ |

* **मञ्जूषातः समुचितपदं चित्वा रिक्तस्थानं पूरयत ।**

रामः पाठं ______ । सोमः चित्रं ______ । रामसोमौ गृहं ______ । गृहे सर्वे मिलित्वा भोजनं ______। राम त्वं अन्नं ______ । भीमार्जुनौ युवां मधुरं ______ । भोजनानन्तरं यूयं सर्वे ______। अहं क्रीडितुं ______ । आवां शालां ______ । वयं संस्कृतकार्यक्रमम् ______।

| | | | | |
|---|---|---|---|---|
| कुर्वन्तु | गच्छताम् | खाद | लिखत | खादतम् |
| आगच्छानि | आगच्छाव | आगच्छाम | पश्यतु | पठतु |

©KTBS Not to be republished

# तृतीयः पाठः

## सन्धिः

वर्णानाम् अत्यन्तं सामीप्यं सन्धिः । सन्धौ वर्णानां लोपः व्यत्यासो वा भवति। सन्धिषु त्रयः प्रकाराः सन्ति । अष्टमकक्ष्यायां स्वरसन्धयः ज्ञाताः । अस्मिन् वत्सरे व्यञ्जनसन्धयः अत्र प्रदत्ताः।

सन्धिः

स्वरसन्धिः व्यञ्जनसन्धिः विसर्गसन्धिः

❖ **व्यञ्जनसन्धिः** - व्यञ्जनवर्णमध्ये जायमानः लोपः व्यत्यासो वा व्यञ्जनासन्धिः इत्युच्यते।

व्यञ्जनसन्धिः

श्चुत्वसन्धिः जश्त्वसन्धिः अनुनासिकसन्धिः अनुस्वारसन्धिः परसवर्णसन्धिः

### १. श्चुत्वसन्धिः

सकारस्य तवर्गस्य च शकारचवर्गभ्यां सम्बन्धे सकारस्य शकारः, तवर्गस्य चवर्गः च आदेशो भवति। यथा -

©KTBS Not to be republished

स् + श् / चवर्गः = श्
तवर्गः + श् / चवर्गः = चवर्गः

रामस् + शेते = रामश्शेते
↓ ↓ ↓
स् + श् = श्

तत् + च = तच्च
↓ ↓ ↓
त् + च् = च्

**उदाहरणानि**

कपिस् + च = कपिश्च।

सत् + जनः = सज्जनः।

**२. जश्त्वसन्धिः**

क् च् ट् त् प् चैतेभ्यः अक्षरेभ्यः परं स्वराः मृदुव्यञ्जनानि वा भवन्ति चेत् क्रमात् ग् ज् ड् द् ब् चैते वर्णाः आदेशाः भवन्ति। यथा -

क्/च्/ट्/त्/प्+स्वरः/मृदुव्यञ्जनानि= ग्/ज्/ड्/द्/ब्

वाक् + ईशः = वागीशः
↓ ↓ ↓
क् + ई = ग्

**उदाहरणानि**

वाक् + भयम् = वाग्भयम्।
अच् + भावः = अज्भावः।
षट् + देवताः = षड्देवताः।
जगत् + गुरुः = जगद्गुरुः।
अप् + जम् = अब्जम्।

अच् + अन्तः = अजन्तः।
षट् + आननः = षडाननः।
तत् + अपि = तदपि।
सुप् + अन्तः = सुबन्तः ।

©KTBS Not to be republished

## ३. अनुनासिकसन्धिः

क् च् ट् त् प् चैतेभ्यः अक्षरेभ्यः परं ङ् ञ् ण् न् म् चैते वर्णाः भवन्ति चेत् क्रमात् ङ् ञ् ण् न् म् चैते वर्णाः आदेशाः भवन्ति। यथा -

क् + ङ् /ञ् /ण् /न् /म् = ङ्
च् + ङ् /ञ् /ण् /न् /म् = ञ्
ट् + ङ् /ञ् /ण् /न् /म् = ण्
त् + ङ् /ञ् /ण् /न् /म् = न्
प् + ङ् /ञ् /ण् /न् /म् = म्

वाक् + मयम् = वाङ्मयम्
क् + म् = ङ्

**उदाहरणानि**

षट् + मुखः = षण्मुखः।
चित् + मयः = चिन्मयः।
जगत् + नायकः = जगन्नायकः।
अप् + मग्नः = अम्मग्नः।

## ४. अनुस्वारसन्धिः

पदान्तस्य मकारस्य व्यञ्जने परे मकारस्य स्थाने अनुस्वारः आदेशः भवति। यथा -

म् + व्यञ्जनानि = ं

ग्रामम् + गच्छति = ग्रामं गच्छति
म् + ग् = ं

©KTBS Not to be republished

**उदाहरणानि**

कथम् + जीवति = कथं जीवति।

पुण्यम् + जनयति = पुण्यं जनयति।

किम् + करोति = किं करोति।

५. **परसवर्णसन्धिः -** अनुस्वारस्य वर्गीयव्यञ्जने परे तत्तद्वर्गस्य पञ्चमवर्णः आदेशो भवति ।

यथा -अं + कितः = अङ्कितः ।

सं + चितः = सञ्चितः ।

अं + डः = अण्डः।

इं + धनम् = इन्धनम् ।

कं + पितः = कम्पितः।

*****

**अभ्यासः**

१. **एकवाक्येन उत्तरं लिखत ।**

१. सन्धिः नाम कः ?

२. सन्धिषु कति प्रकाराः सन्ति? ते के ?

३. व्यञ्जनसन्धयः के ?

४. अनुनासिकवर्णाः के?

२. **सन्धिं विभज्य नाम लिखत ।**

१. तच्चित्रम् २. दिग्भ्रान्तः ३. ल्यबन्तः ४. चिन्मयः

©KTBS Not to be republished

३. **सन्धिं कृत्वा नाम लिखत ।**

१. रामस् + चिनोति ।

२. वाक् + देवी ।

३. जगत् + नायकः ।

४. पुण्यम् + जायते ।

४. **समूहेतरपदं चित्वा लिखत ।**

१. गिरीशः, वागीशः, हरीशः, कपीशः ।

२. दिगम्बरः, वाग्दानम्, तदपि, तथापि ।

३. षडाननः, गजाननः, सिंहासनम् , देवेन्द्रः।

५. **चतुर्थं पदं लिखत ।**

१. तदापि - सवर्णदीर्घसन्धिः :: तदपि ............... ।

२. षडाननः - जश्त्वसन्धिः :: षण्मुखः ............... ।

**अवधेयांशः**

| स्वरसन्धिः | व्यञ्जनसन्धिः | विसर्गसन्धिः |
|---|---|---|
| १. सवर्णदीर्घसन्धिः | १. श्चुत्वसन्धिः | १. विसर्गसत्वसन्धिः |
| २. गुणसन्धिः | २. ष्टुत्वसन्धिः | २. विसर्गलोपसन्धिः |
| ३. वृद्धिसन्धिः | ३. जश्त्वसन्धिः | ३. विसर्गरिफसन्धिः |
| ४. यण्सन्धिः | ४.अनुनासिकसन्धिः | ४. विसर्गोत्वसन्धिः |
| ५. यान्तवान्तादेशसन्धिः | ५. अनुस्वारसन्धिः | ________ |
| ६. पूर्वरूपसन्धिः | ६. परसवर्णसन्धिः | ________ |

©KTBS Not to be republished

| | |
|---|---|
| **कर्कशव्यञ्जनानि**- | क्, ख्, च्, छ्, ट्, ठ्, त्, थ्, प्, फ, श्, ष्, स । |
| **मृदुव्यञ्जनानि** - | ग्, घ्, ङ्, ज्, झ्, ञ्, ड्, ढ्, ण्, द्, ध्, न्, ब्, भ्, म्, य्, र्, ल्, व्, ह् । |

## क्रियाकलापः




**सन्धिवृक्षः**

©KTBS Not to be republished

चतुर्थः पाठः

# भारतमहिमा

महर्षिवेदव्यासेन विरचितं विष्णुपुराणं पुराणेषु अन्यतमम् । पुराणेऽस्मिन् ज्ञानं, कर्म, भक्तिः, उपासनम् इत्यादयः बहवो विषयाः प्रस्तुताः । भारतदेशस्य महिमा अत्र वर्णिता । विष्णुपुराणस्य केचन श्लोकाः अत्र प्रदत्ताः । पराशरमुनिः मैत्रेयम् एतं विषयम् उपदिशति ।



©KTBS Not to be republished

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ।।१।।

पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते ।
यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा ।।२।।

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ।
यतो हि कर्मभूरेषा ह्यतोऽन्या भोगभूमयः ।।३।।

अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ।।४।।

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ।।५।।

जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्याः
ये भारते नेन्द्रियविप्रहीनाः ।।६।।

*****

**भावार्थः**

१. यश्च भूप्रदेशः हिन्दूमहासागरस्य उत्तरभागे वर्तते, हिमालयस्य दक्षिणभागे अस्ति, अपि च यत्र भारत्याः सन्तानः वसति, सः भूप्रदेशः भारतम् इति प्रसिद्धः ।
२. जम्बूद्वीपे पुरुषैः, यज्ञपुरुषः यज्ञाहुतिं स्वीकरोति । यज्ञमयः महाविष्णुः आराध्यते। अन्यद्वीपेषु प्रकारान्तरेण देवताराधनं भवति ।
३. हे महामुने मैत्रेय ! अस्मिन् जम्बूद्वीपे भारतं श्रेष्ठम् अस्ति । अतः एषा भारतभूमिः कर्मभूमिः अस्ति । अन्ये भूप्रदेशाः भोगभूमयः ।
५. देवाः एवं प्रशंसन्ति – 'अस्मिन् भारतदेशे ये पुरुषाः जन्म प्राप्नुवन्ति ते एव धन्याः। ते देवेभ्योऽपि श्रेष्ठाः । यतः भारतदेशः स्वर्गमोक्षयोः प्राप्तिमार्गं दर्शयति।'
६. स्वर्गप्रदायके पुण्यकर्मणि विलीने सति पुनः कुत्र देहबन्धं प्राप्स्याम इति वयं न जानीम। भारतदेशे ये मनुष्याः इन्द्रियशक्तिसहिताः सन्ति, ते एव धन्याः।

©KTBS Not to be republished

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. भारतवर्षस्य सन्ततेः नाम किम् ?

२. भारतभूः कीदृशी ?

३. मानवस्य भारते कथं जन्म लभ्यते ?

४. के गीतकानि गायन्ति ?

५. धन्याः के ?

२. **रिक्तस्थानानि पूरयत ।**

१. वर्षं तत् ................. नाम ।

२. अत्रापि .................. श्रेष्ठम् ।

३. यतो हि कर्मभूरेषा ह्यतोऽन्या .................. ।

४. स्वर्गप्रदे ...................... देहबन्धम् ।

३. **संयोजयत ।**

| अ | आ |
|---|---|
| कर्मभूः | अन्यभूः |
| भोगभूः | गायन्ति |
| देवाः | इज्यते |
| जम्बूद्वीपे | भारतदेशः |

४. **लिङ्गविभक्तिवचनानि लिखत ।**

१. समुद्रस्य २. भारतम् ३. पुरुषैः ४. कर्मणि

५. **लकारपुरुषवचनानि लिखत ।**

१. इज्यते २. गायन्ति ३. जानीम ४. प्राप्स्याम

©KTBS Not to be republished

६. **समानार्थकपदानि लिखत ।**

१. समुद्रः २. मुनिः

३. श्रेष्ठः ४. स्वर्गः

७. **वाक्यानि रचयत ।**

१. गायन्ति २. धन्याः

३. सन्ततिः ४. कर्म

©KTBS Not to be republished

## पञ्चमः पाठः

# क्रियापदम्

तिङन्तं नाम क्रियापदम् । क्रियापदस्य मूलरूपं धातुः इति कथ्यते । क्रियाबोधकाः भू, गम्, पठ्, लिख् इत्यादयः धातवः । क्रियापदे त्रयः भागाः सन्ति ।

धातुः + विकरणप्रत्ययः + तिङ्प्रत्ययः (आख्यातप्रत्ययः)= क्रियापदम्।

संस्कृतभाषायां प्रायः २०००(द्विसहस्रम्) धातवः सन्ति । ते च धातवः दशसु गणेषु विभक्ताः सन्ति । धातुषु परस्मैपदी आत्मनेपदी उभयपदी इति भेदाः भवन्ति ।

१. **परस्मैपदिनः** - पठति, अत्ति, नृत्यति, गणयति इत्यादयः ।

२. **आत्मनेपदिनः** - एधते, मोदते, वन्दते, इत्यादयः ।

३. **उभयपदिनः** - याचति/याचते, राजति/राजते, करोति/कुरुते इत्यादयः।

क्रियायाः, कालस्य, अर्थविशेषस्य च बोधनार्थं दशलकाराः सन्ति । यथा- लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ् (विधिः, आशीः), लुङ्, लृङ् इति ।

अष्टमकक्ष्यायां लट्, लृट्, लङ्लकाराणां परिचयः प्राप्तः अस्ति । ते अत्र पुनः स्मर्यते । अपि च अत्र लोट् लकारस्य विधिलिङ्लकारस्य च परिचयः कार्यते ।

विधिः, आमन्त्रणं, प्रार्थनम् इत्याद्यर्थेषु लोट्लकारः प्रयुज्यते ।

यथा - १. छात्राः पाठं पठन्तु ।
२. वयं ग्रामं गच्छाम ।
३. बालकाः गुरुं वन्दन्ताम् ।
४. वयं यशः लभामहै ।

©KTBS Not to be republished

# वर्तमानकालः

## लट् लकारः

- **लट् लकार :-** क्रियापदानां वर्तमानकालसूचनाय 'लट्' इति लकारः प्रयुज्यते। यथा -

**पठ् इति धातुः- पठनक्रियावाचकः- परस्मैपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पठति | पठतः | पठन्ति |
| **मध्यमपुरुषः** | पठसि | पठथः | पठथ |
| **उत्तमपुरुषः** | पठामि | पठावः | पठामः |

- **वाक्यप्रयोगः यथा -**

| | | |
|---|---|---|
| सः / सा / तत् पठति | तौ / ते / ते पठतः | ते / ताः / तानि पठन्ति |
| त्वं पठसि | युवां पठथः | यूयं पठथ |
| अहं पठामि | आवां पठावः | वयं पठामः |

**वन्द् इति धातुः- वन्दनक्रियावाचकः- आत्मनेपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | वन्दते | वन्देते | वन्दन्ते |
| **मध्यमपुरुषः** | वन्दसे | वन्देथे | वन्दध्वे |
| **उत्तमपुरुषः** | वन्दे | वन्दावहे | वन्दामहे |

- **वाक्यप्रयोगः यथा -**

| | | |
|---|---|---|
| सः / सा / तत् वन्दते | तौ / ते / ते वन्देते | ते / ताः / तानि वन्दन्ते |
| त्वं वन्दसे | युवां वन्देथे | यूयं वन्दध्वे |
| अहं वन्दे | आवां वन्दावहे | वयं वन्दामहे |

Not to be republished ©KTBS

## भूतकालः

## लङ् लकारः

- **लङ् लकार :-** क्रियापदानां भूतकालसूचनाय 'लङ्' इति लकारः प्रयुज्यते। यथा -

**पठ् इति धातुः- पठनक्रियावाचकः- परस्मैपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

**वन्द् इति धातुः- वन्दनक्रियावाचकः- आत्मनेपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवन्दत | अवन्देताम् | अवन्दन्त |
| मध्यमपुरुषः | अवन्दथाः | अवन्देथाम् | अवन्दध्वम् |
| उत्तमपुरुषः | अवन्दे | अवन्दावहि | अवन्दामहि |

## भविष्यत्कालः

## लृट् लकारः

- **लृट् लकार :-** क्रियापदानां भविष्यत्कालसूचनाय 'लृट्' इति लकारः प्रयुज्यते। यथा -

©KTBS Not to be republished

**पठ् इति धातुः- पठनक्रियावाचकः- परस्मैपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

**वन्द् इति धातुः- वन्दनक्रियावाचकः- आत्मनेपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| मध्यमपुरुषः | वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| उत्तमपुरुषः | वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे |

## आज्ञार्थे

## लोट् लकारः

- **लोट् लकार :-** क्रियापदानाम् आज्ञार्थे 'लोट्' इति लकारः प्रयुज्यते। यथा

**पठ् इति धातुः- पठनक्रियावाचकः- परस्मैपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठतु/पठतात् | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ/पठतात् | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |

**वन्द् इति धातुः- वन्दनक्रियावाचकः- आत्मनेपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दताम् | वन्देताम् | वन्दन्ताम् |
| मध्यमपुरुषः | वन्दस्व | वन्देथाम् | वन्दध्वम् |
| उत्तमपुरुषः | वन्दै | वन्दावहै | वन्दामहै |

Not to be republished ©KTBS

# विध्यर्थे सम्भावनार्थे आज्ञार्थे च

## विधि लिङ् लकारः

- **विधि लिङ् लकार :-** क्रियापदानां विधिसम्भावनाज्ञार्थेषु 'लिङ्' इति लकारः प्रयुज्यते। यथा -

**पठ् इति धातुः- पठनक्रियावाचकः- परस्मैपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यमपुरुषः | पठेः | पठेतम् | पठेत |
| उत्तमपुरुषः | पठेयम् | पठेव | पठेम |

**वन्द् इति धातुः- वन्दनक्रियावाचकः-आत्मनेपदी**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्देत | वन्देयाताम् | वन्देरन् |
| मध्यमपुरुषः | वन्देथाः | वन्देयाताम् | वन्देध्वम् |
| उत्तमपुरुषः | वन्देय | वन्देवहि | वन्देमहि |

**दशलकारज्ञापकःश्लोकः**

लट् वर्तमाने लेट् वेदे भूते लङ् लुङ् लिटस्तथा।
विध्याशिषोश्च लिङ् लोटौ लुट् लृट् लृङ् च भविष्यति

© KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरत।**

१. क्रियापदं नाम किम्?

२. संस्कृते प्रायः कति धातवः सन्ति?

३. धातुः नाम कः?

४. कति लकाराः सन्ति?

**२. रिक्तस्थानं पूरयत।**

१. अहं ______________________। (पठति)

२. वयं ______________________। (लिखति)

३. त्वं जलं ______________________। (पिबति)

४. यूयं श्लोकं ______________________। (गायति)

**३. चतुर्थं पदं लिखत।**

१. पठावः - पठामः, वन्दामहे - ______________।

२. वर्तमाने - लट्, भूते - ______________।

३. पठति - परस्मैपदी, वन्दते- ______________।

४. पठतु - प्रथमपुरुषः, वन्दस्व - ______________।

**३. पुरुषत्रये लिखत।**

१. पठतु  २. वन्देत  ३. क्रीडिष्यति  ४. अलिखत्

यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो माभूत् सकलं शकलं सकृत् शकृत् ।।

©KTBS Not to be republished

षष्ठः पाठः

# प्रवासक्षेत्राणि

भारते एव न, किन्तु प्रपञ्चेऽस्मिन् एव कर्णाटकस्य विशिष्टं स्थानमस्ति । कर्णाटके अनेकानि धार्मिकक्षेत्राणि, नैकाः नद्यः, शिक्षणसंस्थाः, ऐतिहासिकस्थानानि च सन्ति । तेषु सोदेक्षेत्रम्, बादामि, बनशङ्करी, सवदत्ति इत्यादीनां परिचयः अत्र क्रियते ।



**१. सोदेक्षेत्रम्** - उत्तरकन्नडमण्डले शिरसिसमीपे विराजते । अस्य सोन्दा इत्यपि नामान्तरमस्ति । श्रीवादिराज-स्वर्णवल्ली-जैनमठानां सङ्गमक्षेत्रमिदम्। अत्र बृहदरण्येन परिवृता शाल्मली नदी मन्दं मन्दं प्रवहति । अस्मिन् क्षेत्रे परम पूज्याः श्रीवादिराजयतिवर्याः तपः अकुर्वन् । शालिवाहनशके १५२२ तमे वर्षे,

©KTBS Not to be republished

निर्मितेषु पञ्चवृन्दावनेषु मध्यवृन्दावने ते समाधिस्थाः भक्तानां प्रार्थनानुसारेण स्वपादुके उत्तरीयञ्च दत्वा, "अहं एकांशेन अत्रैव भवामि" इत्युक्त्वा ऊर्ध्वलोकं गताः। एतत् अधुना वादिराजमठः इति ख्यातः । अत्र पुरातनं श्रीरमात्रिविक्रममन्दिरमपि शोभते ।

क्रि.श. १५५५-१५६८ तमे वर्षे विजयनगरस्य अधीनराजः इम्मडि अरसप्पनायकः सोन्दाप्रदेशम् अपालयत् । सः लक्ष्मीनृसिंहस्य,चन्द्रमौलीश्वरस्य च मन्दिरद्वयं निर्मितवान् । पुरा अत्र कश्चन महाराजः अपुत्रः आसीत् । सः कस्यचित् गुरोः वचनानुसारेण शाल्मलीनद्यां सहस्राधिकशिवलिङ्गानि निर्मीय आराधितवान् । तेन पुत्रवान् बभूव । कालान्तरे इदं स्वर्णवल्लीसंस्थानमिति प्रसिद्धम् । एतस्मिन् क्षेत्रे पुरातनजैनमठमपि अस्ति । तत्र जैनभक्ताः आगत्य स्वजीवनं सार्थकमिति भावयन्ति। एवं शैव-वैष्णव-जैनधर्मीयाणां सङ्गमस्थानम् इदं सर्वधर्मीयाणां श्रद्धाकेन्द्रम् अस्ति।




Not to be republished ©KTBS

**२. बादामि** - इतिहासप्रसिद्धं क्षेत्रम् इदं चालुक्यराजानां राजधानी आसीत् । पुरातनवाणिज्यक्षेत्रम् आसीत् । वातापि इति नामान्तरमपि अस्ति । बृहदाकारयोः पर्वतयोः मध्ये गुहान्तर्गतमन्दिराणि सन्ति । अत्र शैव-वैष्णव-जैनदेवालयाः सन्ति । तेषां भित्तिषु विद्यमानानि चित्राणि चालुक्यानां कलाभिरुचिं प्रदर्शयन्ति । मेणबसदि, मालगत्तिदेवालयः शिवालयः च स्वीयशिल्पकलाद्वारा पुराणकथाः प्रतिपादयन्ति ।

कलोपासकानां रमणीयस्थानं, प्राच्यसंशोधकानाम् आकरस्थानम्, आस्तिकानां पुण्यक्षेत्रमिदं भवति ।



**३. बनशङ्करीक्षेत्रम्** - एतत् बागलकोटे मण्डले विद्यमानं पुण्यक्षेत्रम् । अयं प्रदेशः गहनवनावृतः । अतः देवीमपि बनशङ्करी इति कथयन्ति । इमां देवीम् अत्रत्याः जनाः बालव्व, वनदव्व, सङ्कव्व, शाङ्करी, शिरिवन्ती इत्यादिभिः नामभिः पूजयन्ति । इयं देवी नवदुर्गासु षष्ठावतारिणीति ज्ञायते।

©KTBS Not to be republished



अत्र वार्षिकरथोत्सवसन्दर्भे भक्ताः अष्टोत्तरशतं विभिन्नैः शाकैः सिद्धं खाद्यं देव्यै समर्पयन्ति । इदं पल्लेदहब्ब इति कन्नडभाषायां वदन्ति । कल्याणचालुक्यराजेन प्रथमजगदेकमल्लेन मन्दिरमिदं द्राविडशैल्या निर्मितम् ।

**४. सवदत्ति** - इदं पुराणप्रसिद्धं क्षेत्रं बेलगावि मण्डले वर्तते । यल्लम्मदेव्याः मन्दिरं प्रायः २०००(द्विसहस्रम्) वर्षेभ्यः प्राक् निर्मितमिति इतिहासः सूचयति । किन्तु क्रि.श. १५१४ तमे वर्षे बागिबोम्मप्पनायकः इदं मन्दिरं पुनर्निर्मितवान् इति ज्ञायते । अस्य क्षेत्रस्य विषये काचन कथा श्रूयते । यल्लम्मा आढ्यवीरशैववंशे सञ्जाता । चर्मरोगेण पीडिता सा सवदत्तिक्षेत्रम् आगच्छति । तत्र एक्कय्य जोगय्य इति सिद्धपुरुषस्य अनुग्रहेण तस्याः रोगः विनष्टः । तदा सा तत्रैव सिद्धपुरुषम् अनन्यभक्त्या प्रार्थितवती । सन्तुष्टः सः प्रत्यक्षो भूत्वा त्वम् अत्रैव स्थित्वा भक्ताभीष्टप्रदायिका भव इति अनुग्रहीतवान् । तदारभ्य सा तत्रैव स्थित्वा भक्ताभीष्टं पूरयति ।

*****

©KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. सोदेक्षेत्रे के तपः अकुर्वन् ?

२. स्वर्णवल्लीसंस्थानं कुत्र विराजते?

३. बादामिक्षेत्रस्य अपरं नाम किम् ?

४. ‘‘पल्लेदहब्ब’ कुत्र प्रचलति ?

५. यल्लम्मादेव्याः मन्दिरं कुत्र अस्ति?

**२. रिक्तस्थानं पुरयत ।**

१. शाल्मली नदी मन्दं मन्दं ...................... ।

२. बादामि, पूर्वं ..................... राजधानी आसीत् ।

३. ................. नवदुर्गासु षष्ठावतारिणी ।

४. यल्लम्मा ....................... वंशे जाता ।

५. सोदेक्षेत्रे ....................... मठमपि अस्ति ।

**३. संयोजयत ।**

| | |
|---|---|
| अधीनराजः | श्रीवादिराजमठः । |
| वैष्णवानाम् | स्वर्णवल्लीमठः । |
| लक्ष्मीनृसिंहमन्दिरम् | बनशङ्करी । |
| बालव्व | अरसप्पनायकः । |

**४. सन्धिं विभज्य नाम लिखत ।**

१. आर्योक्तिः   २. नैकाः   ३. भगवदुपासनम्   ४. नामान्तरम्

©KTBS Not to be republished

**५. समूहेतरपदं लिखत ।**

१. रामः, देशः, नद्यः, जनः

२. अहम्, वृक्षम्, मन्दिरम्, पर्णम्

३. बादामि, बनशङ्करी, शिवशङ्करी, सवदत्ति

**६. चतुर्थं पदं लिखत ।**

१. यः - सः :: यदा ..................... ।

२. शाल्मली - नदी :: स्वर्णवल्ली .................. ।

३. कलोपासकानाम् - रमणीयस्थानम् :: आस्तिकानाम् ............।

४. भवति - अभवत् :: वदति ................... ।

**७. कर्णाटकभाषया आङ्लभाषया वा उत्तरं लिखत ।**

१. सोदेक्षेत्रस्य वैशिष्ट्यं वर्णयत ।

२. सवदत्तिक्षेत्रविषये का कथा प्रसिद्धा ?

| जननी जन्मभूमिश्च स्वर्गादपि गरीयसी |
|---|

©KTBS Not to be republished

सप्तमः पाठः

# प्रयोगाः

संस्कृतभाषायां त्रिविधाः प्रयोगाः सन्ति ।

१. **कर्तरिप्रयोगः**

२. **कर्मणिप्रयोगः**

३. **भावेप्रयोगः**

प्रयोगमवलम्ब्य द्विप्रकाराः धातवः सन्ति । ते च सकर्मकाः,अकर्मकाः इति। यस्य धातोः प्रयोगे कर्मपदस्य अपेक्षा भवति सः **सकर्मकः** । यथा - पठति । किं पठतीति अपेक्षायां पाठं, कथां वा इति उत्तरं लभ्यते । अतः पठ्धातुः सकर्मकः।

यस्य धातोः प्रयोगे कर्मपदस्य अपेक्षा न भवति, सः **अकर्मकः** । यथा -हसति । किं हसतीति कर्मणः अपेक्षा न भवत्येव । अतः हस्धातुः अकर्मकः।

सकर्मकधातूनां कर्तरि, कर्मणि च प्रयोगः भवति । अकर्मकधातूनां कर्तरि, भावे च प्रयोगः भवति ।

१. **कर्तरिप्रयोगः** - अस्मिन् प्रयोगे, वाक्ये कर्तृपदं प्रथमाविभक्त्यन्तं भवति। कर्मपदं द्वितीयाविभक्त्यन्तं भवति । क्रियापदं कर्तृपदानुगुणं परस्मैपदम् आत्मनेपदं वा भवति । क्रियापदं कर्तृपदस्य वचनम् अनुसरति । अयं प्रयोगः सर्वेषां धातूनां सम्भवति ।

| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
|---|---|---|
| छात्रः | पाठं | पठति |
| छात्राः | पाठं | पठन्ति |
| सः | गुरुं | वन्दते |
| ते | गुरुं | वन्दन्ते |
| बालकः | श्लोकान् | पठति |

Not to be republished ©KTBS

२. **कर्मणिप्रयोगः** - अस्मिन् प्रयोगे, वाक्ये कर्तृपदं तृतीयाविभक्त्यन्तं भवति । कर्मपदं प्रथमाविभक्त्यन्तं भवति । क्रियापदं कर्मपदानुगुणं वचनं प्राप्य आत्मनेपदमेव भवति । अयं प्रयोगः सर्वेषां सकर्मकधातूनामेव सम्भवति।

| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
|---|---|---|
| छात्रेण | पाठः | पठ्यते |
| छात्रैः | पाठः | पठ्यते |
| तेन | गुरुः | वन्द्यते |
| तैः | गुरुः | वन्द्यते |
| बालकेन | श्लोकाः | पठ्यन्ते |

३. **भावेप्रयोगः** - अस्मिन् प्रयोगे, वाक्ये कर्तृपदं तृतीयाविभक्त्यन्तं भवति । किन्तु कर्मपदं न भवति । क्रियापदं प्रथमपुरुषे एकवचने आत्मनेपदमेव भवति । अकर्मकधातूनां प्रयोगे एव अयं प्रयोगः ।

| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
|---|---|---|
| छात्रेण | - | हस्यते |
| छात्रैः | - | धाव्यते |
| पुष्पेण | - | विकस्यते |
| वृक्षैः | - | कम्प्यते |

©KTBS Not to be republished

## अवधेयांशः

धातुः यदा सकर्मकः तदा कर्तरिकर्मणिप्रयोगौ सम्भवतः । धातुः यदि अकर्मकः तर्हि कर्तरिभावेप्रयोगौ सम्भवतः। यथा -

| कर्तरिप्रयोगः | कर्मणिप्रयोगः | भावेप्रयोगः |
|---|---|---|
| रामः फलं खादति । | रामेण फलं खाद्यते । | - |
| गोपालः गुरुं नमति । | गोपालेन गुरुः नम्यते । | - |
| छात्राः पाठान् पठन्ति । | छात्रैः पाठाः पठ्यन्ते । | - |
| सः तिष्ठति । | - | तेन स्थीयते । |
| सा धावति । | - | तया धाव्यते । |
| अश्वाः धावन्ति । | - | अश्वैः धाव्यते । |

आज्ञाद्यर्थेषु वर्तमानभूतभविष्यत्कालेषु अपि प्रयोगपरिवर्तनं भवितुम् अर्हति । यथा -

| प्रयोगाः | वर्तमानकालः (लट्) | भूतकालः (लङ्) | भविष्यत्कालः (लृट्) | आज्ञा (लोट्) |
|---|---|---|---|---|
| कर्तरि | छात्रः पाठं पठति। | छात्रः पाठम् अपठत्। | छात्रः पाठं पठिष्यति। | छात्रः पाठं पठतु । |
| | भक्तः देवं वन्दते । | भक्तः देवम् अवन्दत। | भक्तः देवं वन्दिष्यते । | भक्तः देवं वन्दताम् । |
| कर्मणि | रामः हसति । | रामः अहसत् । | रामः हसिष्यति । | रामः हसतु । |
| | छात्रेण पाठः पठ्यते । | छात्रेण पाठः अपठ्यत । | छात्रेण पाठः पठिष्यते। | छात्रेण पाठः पठ्यताम् । |
| भावे | भक्तेन देवः वन्द्यते । | भक्तेन देवःअवन्द्यत । | भक्तेन देवः वन्दिष्यते। । | भक्तेन देवः वन्द्यताम् । |
| | रामेण हस्यते । | रामेण अहस्यत । | रामेण हसिष्यते । | रामेण हस्यताम् । |

©KTBS Not to be republished

क्रियापदानि कर्मणिप्रयोगे भावेप्रयोगे च रूपान्तरं प्राप्नुवन्ति । प्रसिद्धानि कानिचन क्रियापदानि अत्र दत्तानि ।

| **कर्तरि** | **कर्मणि** | **भावे** |
|---|---|---|
| पिबति | पीयते | - |
| जानाति | ज्ञायते | - |
| पश्यति | दृश्यते | - |
| ददाति | दीयते | - |
| यच्छति | दीयते | - |
| इच्छति | इष्यते | - |
| गच्छति | गम्यते | - |
| नयति | नीयते | - |
| छिनत्ति | छिद्यते | - |
| गृह्णाति | गृह्यते | - |
| शेते | - | शीयते |
| तिष्ठति | - | स्थीयते |
| अस्ति | - | भूयते |

विशेषसूचना - कृदन्तपदानां प्रयोगे अपि प्रयोगपरिवर्तनं भवति।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. संस्कृतभाषायां कति प्रयोगाः सन्ति? ते के?

२. कस्मिन् प्रयोगे कर्मपदं प्रथमाविभक्तौ भवति ?

३. भावेप्रयोगे कर्तृपदं कस्यां विभक्तौ भवति ?

४. कस्मिन् प्रयोगे क्रियापदं नित्यं प्रथमपुरुषैकवचने भवति ?

©KTBS Not to be republished

२. **द्वित्रैः वाक्यैः उत्तरं लिखत ।**

१. कर्तरिप्रयोगस्य नियमं सोदाहरणं विवृणुत ।

२. भावेप्रयोगस्य नियमः कः ?

३. कर्मणिप्रयोगस्य नियमः कः ?

३. **प्रयोगपरिवर्तनं कुरुत ।**

१. बालिकाः धावन्ति ।

२. हरिः श्लोकान् पठति ।

३. छात्रैः गुरवः नम्यन्ते ।

४. पुष्पाणि विकसन्ति ।

५. अस्माभिः कथाः लिख्यन्ते ।

६. यूयं कदलीफलं खादथ ।

## क्रियाकलापः

* इमानि क्रियापदानि अकर्मकं सकर्मकम् इति पृथक् कुरुत ।

वर्धते, वन्दते, पठति, पृच्छति, शोभते, हसति, भवति, लिखति, धावति, खादति, कम्पते

| अकर्मकम् | सकर्मकम् |
|---|---|
| | |

©KTBS Not to be republished

अष्टमः पाठः

# कर्नाटककालिदासः



अस्माकं कर्नाटकराज्ये प्राचीनकालादपि बहवः संस्कृतकवयः शास्त्रपण्डिताः च आसन् । आधुनिकाः, अपि नैकाः कवयः संस्कृतसाहित्यसृष्टौ निरताः । तेषु 'कर्नाटककालिदासः' इत्युपाधिना पुरस्कृतः बसवप्पशास्त्रिमहोदयः अपि अन्यतमः । तस्य परिचयः अत्र प्रदत्तः ।

मैसूरुसंस्थानस्य राजा तृतीयः कृष्णराजः 'मुम्मडि कृष्णराज ओडेयर्' इति नाम्ना प्रख्यातः आसीत् । सः देशाटनसन्दर्भे महादेवशास्त्रिनामानं कञ्चित् पण्डितम् अद्राक्षीत् । तदा सः राजा तं पण्डितं राजधानीम् आमन्त्रितवान्। महादेवशास्त्री स्वपत्न्या बसवम्मानाम्न्या सह मैसूरुनगरम् आगतवान् । तदनु सः राजसौधे पौरोहित्यकर्मणि नियुक्तः ।

©KTBS Not to be republished

एतयोः दम्पत्योः १८४३ तमे वत्सरे सञ्जातः शिशुरेव बसवप्पशास्त्री । गृहे धनधान्यसमृद्धिः आसीत् । तस्य पितरौ आनन्दतुन्दिलौ आस्ताम् । परन्तु बसवप्पशास्त्रिणः बाल्ये एव तस्य पिता दिवङ्गतः । अतः श्रीकृष्णराजप्रभुः

बालकस्य बसवप्पशास्त्रिणः विद्याभ्यासाय व्यवस्थाम् अकरोत् । बसवप्पशास्त्रि गरलपुरीशशास्त्रिणां शिष्यः भूत्वा कालिदासादीनां काव्यानि नाटकानि पाणिनीयं व्याकरणं च अधीतवान् । मल्लप्पपण्डितस्य निकटे कन्नडकाव्यानि कन्नडव्याकरणं च अभ्यस्तवान् । अष्टादशे वयसि एव सः 'कृष्णराजाभ्युदयम्' इति काव्यं विरचितवान् । कुमारव्यासभारतस्य वाचने बसवप्पशास्त्री अनुपमः इति विख्यातः अभवत् । कतिपयैः एव वर्षैः उभयभाषाविद्वान् इति प्रसिद्धिं प्राप्नोत् ।

मुम्मडि कृष्णराजस्य अनन्तरं श्रीचामराज ओडेयर् इति राजा सिंहासनम् अलङ्कृतवान् । सः राजा तदा बालकः आसीत् । राजामात्यः दिवान रङ्गाचार्यः बसवप्पशास्त्रिणः विद्वत्तया प्रभावितः । सः कन्नडभाषया उत्तमग्रन्थान् रचयितुं संस्कृतनाटकानि च अनूदितुंशास्त्रिणं प्रेरितवान् ।

बसवप्पशास्त्री कन्नडभाषया भामिनीषट्पद्यां 'सावित्रीचरितम्' इति काव्यम् आरचयत् । अस्य काव्यस्य शैली चित्ताकर्षिका सरला च वर्तते । ततः सः 'दमयन्तीस्वयंवरः' इति चम्पूकाव्यं च कन्नडभाषायां विरचितवान् । अस्य काव्यस्य भाषा प्रौढा । पद्यानि नानावृत्तेषु रचितानि । बसवप्पशास्त्रिणा लिखितं 'रेणुकाविजयम्' इति चम्पूकाव्यं 'शङ्करशतकम्' इति स्तोत्रकाव्यं च अपूर्णम् उपलभ्यते । 'अम्बाषोडशमञ्जरी', 'आर्याशतकं', 'त्रिषष्टिपुरातनगणस्तवः', 'शिवाष्टकं', 'शिवभक्तिसुधातरङ्गिणी' इत्यादीनि काव्यानि तेन संस्कृतभाषया रचितानि राजन्ते ।

तस्मिन् काले कन्नडभाषायां रङ्गप्रयोगयोग्यानि नाटकानि विरलानि

©KTBS Not to be republished

आसन्। तदा राजा संस्कृतनाटकानि कन्नडभाषया अनुवादं कर्तुं बसवप्पशास्त्रिणम् आदिशत् । तदाज्ञानुसारेण सः बहूनि नाटकानि श्रेष्ठशैल्या अनूदितवान् । रङ्गे तेषां नाटकानां प्रयोगः अपि कृतः । अभिज्ञानशाकुन्तलनाटकस्य बसवप्पशः अनुवादं दृष्ट्वा सन्तुष्टः दिवान रङ्गाचार्यः तस्मै 'कर्नाटककालिदासः' इति उपाधिं प्रायच्छत् ।

तदनु उत्सुकेन शास्त्रिणा भर्तृहरेः 'शतकत्रयं', 'विक्रमोर्वशीयम्', 'उत्तररामचरितं', 'रत्नावली', 'चण्डकौशिकम्' इत्यादीनि संस्कृतनाटकानि च कन्नडभाषया अनूदितानि । तेन आङ्ग्लकवेः शेक्स्पीयरमहोदयस्य 'ओथेलो' इति नाटकं 'शूरसेनचरितम्' इति नाम्ना कन्नडभाषया अनूदितम् । एवं तेन बहूनि सारस्वतसम्बन्धीनि कार्याणि विहितानि । किन्तु तेन विरचितानि अन्य कानिचन काव्यानि नोपलभ्यन्ते ।

१८९१ तमे वत्सरे फेब्रवरिमासे कस्मिंश्चित् दिने अश्वशकटेन गच्छन् पतितः सः बसवप्पशस्त्रिमहोदयः मृत्युवशं गत इति श्रूयते । मैसूरुनगरस्य समीपे तस्य समाधिस्थलं विद्यते । एवं विद्वज्जनाभिनन्दितः सकलजनप्रियः सरस्वत्याराधकः श्रीबसवप्पशास्त्रि 'कर्नाटककालिदासः' इति सार्थकबिरुदाङ्कितः अद्यापि कर्नाटककविकुलस्य अनर्घ्यम् आभरणम् इव शोभते ।

## अभ्यासः

**१.एकवाक्येन उत्तरत ।**

१. मुम्मडि कृषणराज ओडेयर् कस्य संस्थानस्य राजा आसीत्?
२. बसवप्पशास्त्रिणः पितरौ कौ?
३. महादेवशास्त्री कस्मिन् कर्मणि नियुक्तः?
४. कर्नाटककालिदासः इति उपाधिं कः प्रायच्छत्?
५. 'ओथेलो' नाटकं केन नाम्ना कन्नडभाषया अनूदितम् ?

©KTBS Not to be republished

**२. रिक्तस्थानं पूरयत ।**

१. बसवप्पशास्त्रि गरलपुरीशास्त्रिणां .............. ।

२. बसवप्पशास्त्रिमहोदयः .................काव्यम् आरचयत् ।

३. दिवान रङ्गाचार्यः बसवप्पशास्त्रिमहोदयं ..............इति उपाधिं प्रायच्छत् ।

४. ................. वाचने बसवप्पशास्त्री अनुपमः।

५. मैसूरुनगरस्य समीपे बसवप्पशास्त्रिमहोदयस्य ................ विद्यते ।

**३. सन्धिं विभज्य नाम लिखत ।**

१. राजामात्यः २. इत्यादीनि ३. विद्वज्जनाः ४. देशाटनम्

**४. विरुद्धार्थकपदानि लिखत ।**

१.प्रसिद्धः २. अपूर्णम् ३.सरला ४. श्रेष्ठम्

**५. कर्नाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत।**

१. बसवप्पशास्त्रिणः जीवनविषये लिखत ।

२. बसवप्पशास्त्रिणः 'कर्नाटककालिदासः' इति नाम सार्थकम् इति समर्थयत ।

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।**
**तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम् ॥**

© KTBS Not to be republished

नवमः पाठः

# केन वा मैत्री

एषा कथा नारायणपण्डितेन विरचितस्य हितोपदेशस्य मित्रलाभः इति तन्त्रात् स्वीकृता अस्ति । पशुपक्षिकथाद्वारा नीतिं बोधयति एषः ग्रन्थः। अस्मिन् मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिः इति चत्वारि तन्त्राणि सन्ति । अत्र बालानां सुखबोधाय सरलभाषया लिखिता अस्ति ।

**कविकालकृतीनां परिचयः**

कवेः नाम - नारायणपण्डितः

कालः - प्रायः क्रि.श. ८५०(नवमशतकम्)

देशः - गुर्जरः

आश्रयदाता - धवलचन्द्रमहाराजः

कृतिः - हितोपदेशः

©KTBS Not to be republished



मगधदेशे चम्पकावती नाम अरण्यमस्ति । तस्मिन् चित्राङ्गः नाम हरिणः, सुबुद्धिः नाम काकश्च स्नेहेन निवसतः । सः चित्राङ्गः हृष्टपुष्टाङ्गः सुखेन विहरन् आसीत् । तत्र कश्चन शृगालः तं दृष्ट्वा एवमचिन्तयत्  एतस्य मांसं सुललितया भक्षयामि । अस्तु, अस्य विश्वासं सम्पाद्य कार्यं साधयामि इति ।

चित्राङ्गस्य समीपं गत्वा वदति- 'मित्र! कुशली किल भवान्?' इति । चित्राङ्गः पृच्छति 'कस्त्वम्?' इति। शृगालः वदति- क्षुद्रबुद्धिः नामकः जम्बूकः 'अहम् । अत्र अरण्ये बन्धुमित्रहीनः निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सबन्धुजीवनं प्रविशामि । इतः परं भवता सहैव निवसामि' इति ।

पश्चात् अस्तङ्गते सूर्ये मृगशृगालौ वासभूमिं गतौ । तत्र काकः सुबुद्धिः, जम्बूकं दृष्ट्वा पृच्छति  सखे ! कोऽयं द्वितीयः? इति । तदा चित्राङ्गः वदति- अयं जम्बूकः अस्मत्सख्यमिच्छन् आगतः इति । काको वदति- मित्र! अकस्मादागन्तुना मैत्री न युक्ता ।  यतः 'अज्ञातकुलशीलस्य वासो देयो न कस्यचित्' इति ।

इदमाकर्ण्य जम्बूकः सकोपमाह - 'मृगस्य प्रथमदर्शनदिने भवानपि अज्ञातकुलशीलः एव खलु ? कथं भवतः मैत्री सम्पन्ना ? उदारचरितानां तु वसुधैव कुटुम्बकम्  इति श्रुतं किल। यथायं चित्राङ्गः मम बन्धुः तथैव भवानपि' इति । तदा चित्राङ्गः वदति - 'अस्तु, मैत्रीभावेन वयं तिष्ठामः' इति ।

एकदा शृगालः चित्राङ्गसमीपं वदति - "रे मित्र! अस्मिन् वनप्रदेशे सस्यपूर्णक्षेत्रमेकमस्ति । तत् ते दर्शयिष्यामि इति । तथा कृते सति मृगः प्रत्यहं गत्वा ससन्तोषं सस्यं खादति स्म । अथैकदा क्षेत्रपतिना तदवलोक्य सस्यक्षेत्रे पाशो योजितः। परेद्युः आगतः मृगः पाशैः बद्धः, दुःखेन अचिन्तयत्- एतस्मात् पाशात् मां रक्षितुं मित्रं विना कः समर्थः?" इति ।

©KTBS Not to be republished

अत्रान्तरे क्षुद्रबुद्धिः तत्रागत्य मनसि अचिन्तयत् -"अहो भाग्यम् । मम मनोरथः फलितः । एतस्य रुधिरयुक्तः मांसः मम वशमागतः । मम उत्कृष्टं भोजनं प्राप्तम्" इति । क्षुद्रबुद्धिं दृष्ट्वा चित्राङ्गः वदति - "सखे आगतवान् वा?

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ।।

व्यसने पतितोऽस्मि, मां बन्धनात् मोचय सत्वरं त्रायस्व च" इति ।



क्षुद्रबुद्धिः पाशान् अवलोक्य वदति - 'स्नायुनिर्मिता एते पाशाः। अद्य रविवासरकारणात् मम उपवासः, कथम् एतान् पाशान् कर्तयित्वा भवन्तं मोचयिष्यामि? इत्युक्त्वा तत्रैव कुत्रचित् आत्मानम् आच्छाद्य तिष्ठति ।

©KTBS Not to be republished

अत्रान्तरे सुबुद्धिः प्रदोषकाले अनागतं मित्रम् अन्विष्य तत्रागच्छति । चित्राङ्गं दृष्ट्वा सखे किमेतत्?' इति पृच्छति । मित्रवचनतिरस्कारस्य फलमेतत् । मांसार्थी वञ्चकः अत्रैव कुत्रचित् तिष्ठति इति । चित्राङ्गवचनं श्रुत्वा सुबुद्धिः एवं वदति -

"परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ।।"

प्रभाते क्षेत्रपालः लगुडहस्तः आयाति । तम् अवलोक्य काकः वदति -सखे, चित्राङ्ग ! त्वं मृतवत् वातेन उदरं पूरयित्वा, पादान् स्तम्भीकृत्य तिष्ठ । अहं तव चक्षुषि चञ्च्वा किमपि विलिखामि । यदाहं शब्दं करोमि झटिति पलायनं कुरु इति । चित्राङ्गः तथैव नटनं करोति ।

क्षेत्रपालः मृगं दृष्ट्वा सन्तोषेण एष मृगः स्वयं मृतः इति चिन्तयन् पाशान् निष्कासयति । ततः काकस्य का का इति शब्दं श्रुत्वा चित्राङ्गः सत्वरम् उत्थाय पलायनं करोति । तावता क्षेत्रपालेन क्षिप्तः दण्डः शृगालस्योपरि पतति। सः शृगाल मृतो भवति च ।

*****

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. चम्पकावती अरण्यं कुत्र अस्ति ?
२. शृगालः चित्राङ्गं दृष्ट्वा किम् अचिन्तयत् ?
३. चित्राङ्गः केन बद्धः अभवत् ?
४. प्रभाते क्षेत्रपालः कथं आयाति ?
५. चित्राङ्गः कथमासीत् ?

©KTBS Not to be republished

## २. रिक्तस्थानं पूरयत ।

१. अस्तु अस्य .................. सम्पाद्य कार्यं साधयामि ।

२. तत् ................................ दर्शयिष्यामि ।

३. मां ...................................... मोचय ।

४. झटिति ................................... कुरु ।

## ३. संयोज्य लिखत ।

| | | |
|---|---|---|
| १. | चित्राङ्गः | एते पाशाः |
| २. | जम्बूकः | शीघ्रम् |
| ३. | स्नायुनिर्मिता | हरिणः |
| ४. | सत्वरम् | क्षुद्रबुद्धिः |

## ४. समानार्थकपदानि लिखत ।

१. लगुडः २. शृगालः ३. अरण्यम् ४. चक्षुः

## ५. सन्धिं विभज्य नाम लिखत ।

१. चित्राङ्गः २. वसुधैव ३. तदवलोक्य ४. अत्रान्तरे

## ६. लघूत्तराणि लिखत ।

१. शृगालः स्वपरिचयं कथं करोति ?

२. काकः शृगालविषये किं कथयति ?

३. पाशबद्धं मृगं दृष्ट्वा जम्बूकः किं चिन्तयति ?

## ७. यथानिर्देशम् उत्तरं लिखत ।

१. सखे चित्राङ्ग ! कोऽयं द्वितीयः ।

कः पाठः ? कः वदति ? कं वदति ?

२. मम तावत् उत्कृष्टं भोजनं प्राप्तम् ।

कः पाठः ? कः चिन्तयति ? कं दृष्ट्वा एवं चिन्तयति ?

©KTBS Not to be republished

३.    'मित्रवचनतिरस्कारस्य फलमेतत्' ।

क: पाठ: ? क: वदति ? कं वदति ?

**८. कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

१.    सुबुद्धि: चित्राङ्गं कथं रक्षति ?

२.    शृगाल: चित्राङ्गं कथं वञ्चयति?

## क्रियाकलाप:

**मञ्जूषायां विद्यमानशब्दानां द्वितीयाविभक्त्यन्तरूपै: रिक्तस्थानानि पूरयत।**

| मित्रम्, क्षेत्रपाल:, हितोपदेश:, जम्बूक:, विश्वास:, अहं, भक्ता:, गुरु: |
|---|

१.    काक : ........................ पश्यति ।

२.    चित्राङ्गस्य ...................... सम्पादयति ।

३.    हे मित्र .......................... रक्षतु ।

४.    अनागतं .......................... अन्विष्य तत्र आगच्छति ।

५.    सुबुद्धि: .......................... पश्यति ।

६.    नारायणपण्डित: ...................... अलिखत् ।

७.    देव: ........................ पालयति ।

८.    शिष्य: ............................ नमति ।

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।**
**फलान्यपि परार्थाय वृक्षा: सत्पुरुषा यथा ।।**

©KTBS Not to be republished

दशमः पाठः

# सूक्तिमन्दाकिनी

कण्ठपाठः करणीयः

सुष्ठु भाषितं सुभाषितम् । संस्कृतवाङ्मये सुन्दराणि सुभाषितानि शोभन्ते। वेद-शास्त्र-पुराण-इतिहास-काव्य-नाटकादिषु रम्याणि सुभाषितानि उपलभ्यन्ते । सुभाषितानि नीतिं, तत्त्वं, व्यवहारचातुर्यं च प्रबोध्य लोकव्यवहारं सन्मार्गं च दर्शयन्ति ।

आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ।।१।।

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः ।।२।।

वनेऽपि सिंहा मृगमांसभक्ष्याः
बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता
न नीतिमार्गं परिलङ्घयन्ति ।।३।।

पापान्निवारयति योजयते हिताय
गुह्यञ्च गूहति गुणान् प्रकटीकरोति ।
आपद्गतञ्च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।४।।

*****

Not to be republished ©KTBS

## भावार्थः

१. विद्यायाः अंशचतुष्टये शिष्यः आचार्यात् एकांशं स्वीकरोति । एकांशं स्वस्य बुद्धिशक्त्या सम्पादयति । सहपाठिनां सहवासेन तृतीयांशम् अवगच्छति । अन्तिमभागांशं कालक्रमेण जानाति ।

२. मन्त्रेण रहितम् अक्षरं नास्ति । औषधगुणरहिता मूलिका नास्ति । अनर्हः मनुष्यः नास्ति । परन्तु तान् संयोजयितुं योजकः विरलः ।

३. यथा प्राणिपिशिताहारिणः मृगराजाः अटव्यां क्षुत्पीडिता अपि तृणं न खादन्ति । तथैव सत्कुलप्रसूताः सङ्कष्टे सन्त्यपि न्यायमार्गं न परित्यजन्ति।

४. उत्तमः वयस्यः, मित्रं दोषात् निवार्य उत्तमकार्येषु योजयति । गुह्यं न प्रकाशयति। गुणान् प्रकटीकरोति । कष्टकाले अपि त्यक्त्वा न गच्छति। धनादि साहाय्यं करोति । इदं सन्मित्रलक्षणम् इति सज्जनाः वदन्ति।

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. कः दुर्लभः ?

२. कः पापात् निवारयति ?

३. सिंहाः किं भक्षयन्ति ?

४. छात्रः कस्मात् पादमादत्ते ?

५. के नीतिमार्गं न त्यजन्ति ?

२. **रिक्तस्थानानि पूरयत ।**

१. अमन्त्रमक्षरं ................. ।

२. योजकस्तत्र ................. ।

३. न .................... परिलङ्घयन्ति ।

४. पापान्निवारयति ........................ हिताय ।

५. पादं ............................ च ।

©KTBS Not to be republished

**३. द्वित्रैः वाक्यैः उत्तरं लिखत ।**

१. सन्मित्रलक्षणं किम् ?

२. छात्रः विद्यां कथं सम्पादयति ?

**४. विरुद्धार्थकपदं लिखत ।**

१. अनौषधम् २. अयोग्यः ३. हितम् ४. नीतिः

**५. पर्यायपदं लिखत ।**

१. अक्षरम् २. मृगराजः ३. सन्तः ४. मेधा

## क्रियाकलापः

* अत्र विशेष्यं विशेषणं च चित्वा लिखत । यथा -

| | विशेष्यं | विशेषणं |
|---|---|---|
| यथा - श्रीरामः सुन्दरः। - | श्रीरामः | सुन्दरः |
| १. विधेयः बालकः। | ________ | ________ |
| २. बुद्धिमान् युवकः। | ________ | ________ |
| ३. विनयशीलः युवकः। | ________ | ________ |
| ४. उन्नताः वृक्षाः। | ________ | ________ |
| ५. नीलः मेघः। | ________ | ________ |
| ६. हरितानि पर्णानि । | ________ | ________ |
| ७. चतुराः छात्राः पठन्ति। | ________ | ________ |
| ८. सामान्याः जनाः जीवन्ति। | ________ | ________ |

**परिवर्तिनि संसारे मृतः को वा न जायते ।**
**स जातो येन जातेन याति देशः समुन्नतिम् ।।**

Not to be republished ©KTBS

# एकादशः पाठः

## समासः

समासः नाम सङ्क्षेपः । अनेकेषां पदानां सङ्क्षेपेण कथनमेव समासः । समासः प्रधानतया चतुर्धा विभज्यते । अत्र तेषु अन्यतमः तत्पुरुषसमासः प्रदत्तः ।

अनेकानि पदनि समासद्वारा मिलित्वा एकं कञ्चन अर्थं यच्छन्ति । समासे समस्तपदं विग्रहवाक्यम् इति अंशद्वयं भवति । विग्रहवाक्यं नाम समासस्य अर्थावबोधकं वाक्यम् । यथा- **सीतायाः पतिः** । समस्तपदं नाम समासेन निष्पन्नं पदम् । यथा- सीतापतिः । समासस्य प्राधान्येन चत्वारः प्रकाराः भवन्ति । यथा-

समासः
- द्वन्द्वः
- तत्पुरुषः
- बहुव्रीहिः
- अव्ययीभावः

**तत्पुरुषसमासः**-प्रायः उत्तरपदार्थप्रधानः तत्पुरुषसमासः भवति । तत्पुरुषस्य विभागः एवमस्ति ।

तत्पुरुषः
- सामान्यतत्पुरुषः
- विशेषतत्पुरुषः
  - नञ् तत्पुरुषः
  - द्विगुः
  - कर्मधारयः

- **सामान्यतत्पुरुषः**- सामान्यतत्पुरुषे विग्रहवाक्यं सप्तानां विभक्तीनाम् आधारेण भवति । अतः अत्र सप्त भेदाः सन्ति । यथा-

©KTBS Not to be republished

| क्र.सं | समासभेदः | विग्रहवाक्यं | समस्तपदम् |
| --- | --- | --- | --- |
| ०१. | प्रथमातत्पुरुषः | अर्धं ग्रामस्य | अर्धग्रामः |
| ०२. | द्वितीयातत्पुरुषः | गृहं गतः | गृहगतः |
| ०३. | तृतीयातत्पुरुषः | भासेन रचितम् | भासरचितम् |
| ०४. | चतुर्थीतत्पुरुषः | भूताय बलिः | भूतबलिः |
| ०५. | पञ्चमीतत्पुरुषः | चोरात् भयम् | चोरभयम् |
| ०६. | षष्ठीतत्पुरुषः | वृक्षस्य मूलम् | वृक्षमूलम् |
| ०७. | सप्तमीतत्पुरुषः | कार्ये कुशलः | कार्यकुशलः |

- **विशेषतत्पुरुषः**-विशेषतत्पुरुषे त्रयः भेदाः वर्तन्ते । तद्यथा-

१. **नञ् तत्पुरुषः** - अभावस्य विरुद्धार्थकपदस्य च बोधने नञ् तत्पुरुषसासः प्रयुज्यते । अत्र पूर्वपदे 'नकारः' भवति । यथा-

| **विग्रहवाक्यं** | **समस्तपदम्** |
| --- | --- |
| न सन्देहः | असन्देहः |
| न धर्मः | अधर्मः |
| न आदरः | अनादरः |
| न अनुकूलम् | अननुकूलम् |
| न अनुभवः | अननुभवः |

२. **द्विगुसमासः**- समस्तपदे यदा पूर्वपदं सङ्ख्यावाचकं भवति तदा द्विगुसमासः भवति । अत्र समस्तपदं समूहवाचकं भवति तथैव क्वचित् स्त्रीलिङ्गे उत नपुंसकलिङ्गे भवति । यथा-

©KTBS Not to be republished

| विग्रहवाक्यं | समस्तपदम् |
|---|---|
| पञ्चानां वटानां समाहारः | पञ्चवटी |
| त्रयाणां लोकानां समाहारः | त्रिलोकी |
| चतुर्णां युगानां समाहारः | चतुर्युगम् |
| नवानां रात्रीणां समाहारः | नवरात्रम् |

३. **कर्मधारयः** -कर्मधारयसमासे पूर्वपदस्य उत्तरपदस्य च विभक्तिः भवति । अत्र प्रधानतया अष्ट भेदाः सन्ति । ते च -

| क्र.सं | समासभेदः | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|---|
| ०१. | विशेषणपूर्वपदः | नीलः च असौ मेघः च | नीलमेघः |
| ०२. | विशेषणोत्तरपदः | नरः च असौ अधमः च | नराधमः |
| ०३. | विशेषणोभयपदः | राजा च असौ ऋषिः च | राजर्षिः |
| ०४. | उपमानपूर्वपदः | कुसुमम् इव कोमलम् | कुसुमकोमलम् |
| ०५. | उपमानोत्तरपदः | मुखं कमलम् इव | मुखकमलम् |
| ०६. | अवधारणपूर्वपदः | विद्या एव धनम् | विद्याधनम् |
| ०७. | सम्भावनापूर्वपदः | कैलास इति पर्वतः | कैलासपर्वतः |
| ०८. | मध्यमपदलोपः | शाकप्रियः पार्थिवः | शाकपार्थिवः |

## अभ्यासः

१. **एकवाक्येन उत्तरत ।**

१. समासः नाम कः?

२. सामान्यतत्पुरुषे कति भेदाः सन्ति?

३. द्विगुसमासे पूर्वपदं किं भवति?

४. पूर्वोत्तरपदयोः विभक्तिः कस्मिन् समासे समाना भवति?

Not to be republished ©KTBS

२. **विग्रहवाक्यं लिखत ।**

१. अर्धग्रामः २. अधर्मः ३. नीलमेघः ४. त्रिलोकी

३. **समस्तपदं लिखत ।**

१. नरः च असौ अधमः च= ________________ ।

२. चोरात् भयम्= ________________ ।

३. चतुर्णां भुवनानां समाहारः=________________ ।

४. न अनुभवः________________ ।

४. **चतुर्थपदं लिखत ।**

१. राजर्षिः- कर्मधारयः, पञ्चवटी - ________________ ।

२. नवरात्रम्- द्विगुः, वृक्षमूलम्________________ ।

३. असन्देहः- नञ् तत्पुरुषः, कुसुमकोमलम् ________________ ।

४. भूतबलिः- सामान्यतत्पुरुषः, अनादरः________________ ।

**अवधेयांशः**

**संस्कृतभाषायां समासानां प्रयोगः**

एकः **लघुबालकः** एकदा **मार्गभ्रष्टः घोरारण्यं** प्रविष्टः । तत्र सः **भयङ्करव्याघ्रं** दृष्टवान् । **व्याघ्रभीतः** सः **त्रिलोकरक्षकं** देवं स्मृतवान् । भक्तविषये देवस्य मनः **कुसुमकोमलं** भवति । अतः सः प्रत्यक्षो भूत्वा बालाय **अभयं** दत्तवान् ।

©KTBS Not to be republished

द्वादशः पाठः

# विभूतिपुरुषः



कदाचित् मल्लाडिहल्लि अनाथसेवाश्रमे उपन्यासं कर्तुं कश्चन उपन्यासकः मैसूरुनगरात् समागतवान्। तस्य स्वागतं कर्तुम् अर्धोरुककरांशुकधारी कश्चन पुमान् आगतवान्। सः उपन्यासकस्य स्यूतादिकं कार्याने स्थापितवान्। मार्गे उपन्यासकेन 'भवतः नाम किम्?' इति पृष्टः सः 'मम नाम तिरुकप्प' इति उक्तवान्। पुनः उपन्यासकः पृष्टवान् 'स्वामिनः कुशलिनः वा? गमनानन्तरं सहसैव तेषां दर्शनं भवति वा'? इति। 'आम्, कुशलिनः। दर्शनं तु सर्वदा लभ्यते' इत्युत्तरं तिरुकप्प दत्तवान्।

आश्रमागमनानन्तरं तिरुकप्प उपन्यासकस्य वासादिव्यवस्थाः कल्पितवान्। उपन्यासकः स्नानादिकं समाप्य फलपुष्पैः सह स्वामिनां दर्शनाय तपोवनस्थं लघुकुटीरम् अगच्छत्। तत्र सैव अर्धोरुकधारी तिरुकप्प आसीत्। स एव तिरुकप्प 'अभिनवधन्वन्तरिः' इति प्रथितः, 'योगाचार्यः' 'शतोत्तरायुषी', 'तिरुक' इति विख्यातः मल्लाडिहल्लि श्रीराघवेन्द्रस्वामी।

तस्य जन्मनाम 'कुमारस्वामी' इति। तस्य पिता अनन्तपद्मनाभनम्बूदरी माता च पद्माम्बाल्। कदाचित् ज्यौतिषिकः नम्बूदरिमहोदयः कुलदेवतायाः कोल्लूरु मूकाम्बिकायाः दर्शनार्थं सकुटुम्बः प्रस्थाय उडुपि मण्डले बार्कूर ग्रामे वासं कृतवान्। सन्निवेशवशात् यात्रा स्थगिता। सः ज्यौतिषेण तत्रैव जीवनं यापयति स्म। कदाचित् तत्रागताः मन्त्रालयश्रीचरणाः बालकं दृष्ट्वा 'एषः

©KTBS Not to be republished

कालान्तरे महापुरुषः भविष्यति' इति अनुगृहीतवन्तः। गच्छति काले पत्न्याः मरणानन्तरं नम्बूदरिमहाभागः एनं बालकं स्वार्जितधनेन सह भाटकगृहस्वामिनां हस्ते समर्प्य देशान्तरम् अगच्छत्। दत्तकविधिना प्रदत्तः अयं कुमारस्वामी 'राघवेन्द्रः' इति नामान्तरं प्राप्तवान्।

राघवेन्द्रः 'बार्कूर्' ग्रामे प्राथमिकशिक्षणं, 'कुन्दापुरे' प्रौढशिक्षणं च प्राप्य दैवसाक्षात्काराय गुरुम् अन्वेष्टुकामः गृहं त्यक्तवान्। ततः पळनिस्वामिनः सकाशात् 'हठयोगम्' श्रीशिवानन्देभ्यः 'योगविद्यां' च आन्तम् अधीतवान्। अपि च बरोडानगरे प्रसिद्धायां 'जुम्मा दादा' व्यायामशालायां मल्लविद्यया सह लाठी, काटि, अश्वारोहणादिविद्याः अधीतवान्। लाहोर नगरे बाबा लक्ष्मणदासात् चरकसुश्रुतादीनाम् आयुर्वेदग्रंथान् प्रयोगपूर्वकम् अधीतवान्।

श्रीस्वामिशिवानन्देन, गान्धीमहात्मना च प्रभावितः राघवेन्द्रः स्वातन्त्र्यान्दोलने प्रविष्टवान् । कर्णाटके प्रतिग्रामं योगशिबिरमाध्यमेन जनान् जागरितवान् । जनमानसे सः राघवेन्द्रस्वामीजी व्यायाममेष्ट्रु इति च प्रथितः अभवत् ।



एवं क्रि.श. १९४३ तमे वर्षे योगशिबिरार्थं मल्लाडिहल्लिग्रामं प्रविष्टवान् । सः तु कुग्रामः । जनाः निरक्षरकुक्षिणः, संस्कारवञ्चिताः च आसन्। तेषां दुरवस्थां, ज्ञात्वा अत्रैव शिवरात्रि-शुभदिने अनाथसेवाश्रमं स्थापितवान् । राघवेन्द्रस्वामिनां सेवाकार्येण प्रभावितः मल्लाडिहल्लि सर्वकारीय-प्राथमिकशालायां शिक्षकः सूर्यनारायणः इति कश्चन युवकः स्वोद्योगमपि त्यक्त्वा सूरदासःइति नाम्ना तस्य शिष्यः अभवत्।

इदानीमपि सहस्रशः छात्राः अत्र अध्ययनं कुर्वन्ति । केवलं भिक्षाटनेन



©KTBS Not to be republished

सम्पादितद्रव्येण लक्षशः जनानां निश्शुल्कं वैद्ययोगविद्यादिशिक्षणदाता, विभूतिपुरुषः श्रीराघवेन्द्रस्वामी महाशयः । एषः महापुरुषः १९९६ आगष्ट् मासस्य तृतीयदिनाङ्के १०६ तमे वयसि भगवत्सान्निध्यं प्राप्तवान् । सेवाधर्मः परमगहनो योगिनामप्यगम्यः इति वचनम् अस्य महापुरुषस्य साक्षादन्वेति ।

*****

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. उपन्यासकस्य स्वागतं कर्तुं कः अगतवान् ?

२. राघवेन्द्रस्वामिनः जन्मनाम किम् ?

३. राघवेन्द्रस्वामिनः पितरौ कौ ?

४. नम्बूदरिमहोदयस्य कुलदेवता का ?

५. राघवेन्द्रस्वामिनः प्राथमिकशिक्षणं कुत्र अभवत् ?

**२. रिक्तस्थानानि पूरयत ।**

१. तिरुकप्प उपन्यासकस्य .................. कल्पितवान्।

२. उपन्यासकः...............सह स्वामिनां दर्शनार्थम् आगतवान् ।

३. राघवेन्द्रः ..............तमे वर्षे मल्लाडिहल्लिग्रामम् आगतवान् ।

४. नम्बूदरी महाभागः यात्राप्रसङ्गेन ................ गतवान् ।

**३. द्वित्रैः वाक्यैः उत्तरं लिखत ।**

१. नम्बूदरी महाभागः यात्राप्रसङ्गेन कुत्र प्रस्थितवान् ? तस्य यात्रा किमर्थं स्थगिता अभवत् ?

२. राघवेन्द्रः जुम्मा दादा व्यायामशालायां किं किम् अधीतवान् ?

©KTBS Not to be republished

**४. सन्धिं विभज्य नाम लिखत ।**

१. विशेषोपन्यासः=............+............=............।

२. सहसैव=............+............=............।

३. स्वस्यापराधः=............+............=............।

४. स्वोद्योगम्=............+............=............।

**५. विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

१. फलपुष्पैः ............ ।

२. महापुरुषः ............ ।

३. अश्वारोहणम् ............ ।

४. जनमानसे ............ ।

**६. लिङ्गविभक्तिवचनानि लिखत ।**

१. यात्रा २. आयुर्वेदे

३. तव ४. भिक्षाटनेन

**७. लकारपुरुषवचनानि लिखत ।**

१. प्रविशति २. आसीत् ३. भविष्यति

**८. कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

१. विविधक्षेत्रेषु राघवेन्द्रस्वामिनां योगदानं वर्णयत ।

©KTBS Not to be republished

# क्रियाकलापः

* पाठान्तर्गतकृदन्तपदानि चिनुत । तेषां लङ्लकाररूपाणि लिखत ।

| कृदन्तम् | लङ्लकारः |
| --- | --- |
| यथा - समागतवान् | समागच्छत् |
| १. ______ | ______ |
| २. ______ | ______ |
| ३. ______ | ______ |
| ४. ______ | ______ |
| ५. ______ | ______ |

* स्त्रीलिङ्गरूपाणि लिखत ।

| | |
| --- | --- |
| यथा - पृष्ठवान् | पृष्ठवती |
| १. ______ | ______ |
| २. ______ | ______ |
| ३. ______ | ______ |
| ४. ______ | ______ |
| ५. ______ | ______ |

©KTBS Not to be republished

## अवधेयांशः

**श्रीराघवेन्द्रस्वामिनां भिक्षापात्रात् आविर्भूताः साधनबिन्दवः**

- राष्ट्रियविविधोद्देशप्रौढशाला (N.M.P.H.S) । १९५०
- शिक्षकप्रशिक्षणमहाविद्यालयः । (१९६७)
- पदविपूर्वविद्यालयः ।
- दैहिकशिक्षणमहाविद्यालयः ।
- शिक्षणमहाविद्यालयः ।
- आयुर्वेदमहाविद्यालयः ।
- महावैद्यालयः ।
- आयुर्वेद- औषधोत्पन्नघटकः
- छात्रावासः
- औषधवनम्
- व्यायामशाला
- मृत्तिका - अखाड
- व्यासपीठम्

एभिः रचिताः ग्रन्थाः

- बृहद्योगदर्शनम्
- स्वयं वैद्यः
- वनौषधिगुणधर्मः
- षट्कर्मविधिः
- जोलिगेय पवाड ( आत्मकथन ग्रन्थः)
- सूर्यनमस्कारः

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ।।**

©KTBS Not to be republished

# त्रयोदशः पाठः

## अलङ्कारः

शब्दस्य अर्थस्य च सहभावः साहित्यम् । तदेव काव्यमिति व्यवहृतम्। शब्दार्थसहितौ काव्यम् । तथा च काव्यस्य शरीरं शब्दार्थौ । कवयः काव्यस्य सौन्दर्यं वर्धयितुम् अलङ्कारान् आश्रयन्ति । येन शब्दविन्यासक्रमेण अर्थप्रतिपादनक्रमेण वा काव्यस्य शोभा वर्धते, सः **अलङ्कारः** ।

स च अलङ्कारः द्विविधः - १. **शब्दालङ्कारः** २. **अर्थालङ्कारः**

१. **शब्दालङ्कारः** - शब्दानां विन्यासस्य यः क्रमः काव्यस्य शोभां वर्धयति सः शब्दालङ्कारः । यथा - अनुप्रासयमकादयः।

यथा -अमरी कबरी भारभ्रमरी मुखरीकृतम्।

अत्र 'अन्त' शब्दस्य विन्यासः काव्यस्य शोभां वर्धयति ।

लक्षणम् - एकस्यैव व्यञ्जनस्य पुनरावृत्तिः अनुप्रासः।

२. **अर्थालङ्कारः**- अर्थप्रतिपादनस्य यः क्रमः काव्यस्य शोभां वर्धयति सः अर्थालङ्कारः । अर्थालङ्कारे उपमादिशताधिकाः भेदाः सन्ति ।

©KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरत ।**

१. अलङ्कारः नाम कः ?

२. अलङ्कारस्य भेदौ कौ ?

३. शब्दालङ्कारः कः ?

४. अर्थालङ्कारः कः ?

### क्रियाकलापः

पूर्वतनपाठेषु आगतानि अनुप्रासानां उदाहरणानि अन्विष्य लक्षणसमन्वयं कुरुत।

**करारविन्देन पदारविन्दं**
**मुखारविन्दे विनिवेशयन्तम् ।**
**वटस्य पत्रस्य पुटे शयानम्**
**बालं मुकुन्दं मनसा स्मरामि ।।**

©KTBS Not to be republished

# चतुर्दशः पाठः

## संस्कृतं हि जीवितम्

संस्कृतभाषा जगतः प्राचीनतमा भाषा । अर्वाचीनाः विद्वांसः अपि अनया भाषया काव्यानि, नाटकानि, गीतानि च रचितवन्तः । संस्कृताभ्युदयसाधकं गीतमेकम् अत्र दत्तमस्ति । अयं पद्यभागः १९६४ तमे वर्षे बेङ्गलूरुनगरे आयोजिते संस्कृतपरिषदः अष्टमाधिवेशने विद्वान् के.एस्.भास्करभट्टेन रचितः विद्वद्भिः प्रशंसितश्च ।



- ✻ कविः - विद्वान् के.एस्.भास्करभट्टः ।
- ✻ कालः - ०३.०२.१९२१- ३०.०४.२००९.
- ✻ जन्मस्थानम्- शिवमोग्गमण्डलस्य सागरप्रान्ते ''भीमनकोणे ग्रामः'' ।
- ✻ कृतयः - श्रीगुरुकृपातरङ्गिणी, देवीविलासः ।
- ✻ विशेषः- अधीतालङ्कारशास्त्रः असौ 'विद्वान्' इति उपाधिं प्राप्तवान् । तारुण्ये एव साहित्यभूषणः इत्युपाधिना पुरस्कृतः ।

१. एहि एहि भारत संस्कृतस्य वृद्धये ।
    पाहि पाहि संस्कृतं भारतस्य सम्पदम् ।।

२. संस्कृतं हि जीवितं सर्वलोकभाषिणां
    संस्कृतेश्च बोधकं भारतैकवासिनाम् ।
    संस्कृतं सनातनं प्राच्यतत्त्वधारकं

© KTBS Not to be republished



३. संस्कृतं न केवलं मानवस्य भाषितं
नाकलोकवासिनाप्येतदेव कांक्षितम् ।
देश्यभाषिभिर्बुधैर्मातृवत्पुरस्कृतं
ह्यन्यदेशपण्डितैरादरेण सत्कृतम् ।। एहि ।।

४. व्यास-नाकुजात-भास-कालिदास-लालितं
भोज-माघ-हर्ष-बाण-भारविप्रफुल्लितम् ।
एवमुज्ज्वलं महत् संस्कृतं सनातनं
नैव तन्मृतं भवेद्यज्जनैः प्रभाष्यते ।।एहि।।

५. अस्मदार्यपालितं सूनृतोक्तिभाजनं

©KTBS Not to be republished

संस्कृतं नु विस्मरेदस्मदीयभूः कथम् ।
संस्कृतस्य पोषणं भारतस्य भूषणं
संस्कृतस्य दूषणं स्वात्मनाशकारणम् ।। एहि ।।

६. संस्कृतं समेधतां संस्कृतं महीयतां
संस्कृतं दिने दिने वर्धतां गृहे गृहे ।
भास्करः कविः सुधीः संस्कृतप्रचारकं
गीतमातनोत्यसौ भावुकात्मतुष्टये ।। एहि ।।

*****

१. हे भारतीय,भारतदेशस्य ऐश्वर्यभूतायाः संस्कृतभाषायाः अभिवृद्धये प्रयत्नं कुरु।

२. संस्कृतं सर्वासां भाषाणां जीवितं, भारतदेशस्य परम्परायाःनिरूपकं, प्राच्यदेशस्य तत्त्वप्रतिपादकं, पुरातनं, भोगमोक्षयोः साधकं शाश्वतं च अस्ति ।

३. इदं संस्कृतं न केवलं मानवेन भाषितम्, अपि तु स्वर्गलोकवासिनां पुण्यजीविनाम् अपि अतीव इष्टम् । संस्कृतं देशीयभाषाविद्वद्भिः मातृवत् पुरस्कृतं, विदेशीयैः विद्वद्भिः गौरवेण सम्मानितं च ।

४. संस्कृतभाषा व्यास-वाल्मीकि -भास-कालिदासादिभिः महाकविभिः परिपालिता, भोज-माघ-हर्ष-बाण-भारविभिः कविपुङ्गवैः विकासिता, एवं प्रकाशमाना महत्त्वपूर्णा नित्यनूतना च अस्ति । 'संस्कृतं जनैः भाष्यमाणमस्ति' इति कारणतः मृतभाषा न । परन्तु अमृतभाषा एव।

५. अस्माकं पूर्वजैः पालितं मृदुमधुरोक्तीनाम् आश्रयं संस्कृतमिदं देशोयं कथं विस्मरेत्? विस्मर्तुं न शक्नोति । संस्कृतस्य पालनं भारतीयानां भूषणं,



©KTBS Not to be republished

संस्कृतस्य तिरस्कारः आत्मनः देशस्य च नाशस्य कारणं भवति ।

६. प्रतिगृहं संस्कृतभाषा उत्तरोत्तरं वृद्धिं प्राप्नोतु । संस्कृतं जयतु । संस्कृतवाणी समुल्लसतु इति पण्डितः भास्करो नाम कविः संस्कृतभाषाप्रसारात्मकं गीतम् आत्मनः परितोषार्थं विरचयति ।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. संस्कृतं कस्य सम्पत् ?

२. देश्यभाषिभिः बुधैः मातृवत् पुरस्कृतं किम् ?

३. कैः कविभिः संस्कृतं लालितम् ?

४. भारतस्य भूषणं किम् ?

५. अस्य पद्यस्य कर्ता कः ?

**२. रिक्तस्थानानि पूरयत ।**

१. भारतस्य सम्पदं ......................पाहि ।

२. सर्वलोकभाषिणां ...................... संस्कृतम् ।

३. नाकलोकवासिनामपि ...................... कांक्षितम् ।

४. संस्कृतस्य दूषणं ...................... कारणम् ।

५. संस्कृतस्य पोषणम् ...................... ।

**३. सन्धिं विभज्य सन्धिनाम लिखत ।**

१. भारतैकवासिनाम् =............+............=............।

२. आतनोत्यसौ =............+............=............।

©KTBS
Not to be republished

३. ह्यन्यदेशः=............+............=............।

४. यज्ञनैः=............+............=............।

५. दिगन्तरे=............+............=............।

**४. लकारपुरुषवचनानि लिखत ।**

१. एहि २. प्रभाष्यते ३. आतनोति ४.भवेत्

**५. लिङ्गविभक्तिवचनानि लिखत ।**

१. जगतः २. उक्तिः

३. सुधीः ४. गृहे

**६. समानार्थकपदानि लिखत ।**

१. सुधा २. सम्पदम् ३. सनातनम् ४. लसन्ति

**७. विरुद्धार्थकपदं लिखत ।**

१. नाकः २. पुरस्कृतम्

३. मृतम् ४. महत्

©KTBS Not to be republished

## क्रियाकलापः







* उदाहरणानुगुणं लिखत ।

यथा - संस्कृतं व्यासेन लालितम् ।

१. ______________________ ।

२. ______________________ ।

३. ______________________ ।

४. ______________________ ।

५. ______________________ ।

©KTBS Not to be republished

* उदाहरणानुगुणं लिखत ।

१. संस्कृतभाषा वेदशास्त्रसुन्दरम् अस्ति ।

२. संस्कृतभाषा __________ अस्ति ।

३. ____________________________________________ ।

४. ____________________________________________ ।

**अवधेयांशः**

इण् गतौ धातुः लोट्लकारः परस्मैपदी

| | | |
|---|---|---|
| एतु / इतात् | इताम् | यन्तु |
| इहि / इतात् | इतम् | इत |
| यानि | याव | याम |

पा-रक्षणे धातुः लोट्लकारः परस्मैपदी

| | | |
|---|---|---|
| पातु / पातात् | पाताम् | पान्तु |
| पाहि / पातात् | पातम् | पात |
| पानि | पाव | पाम |

©KTBS Not to be republished

# पञ्चदशः पाठः

## छन्दः

संस्कृतभाषायां पद्यानां रचनावसरे कश्चित् क्रमः, कश्चन नियमः कविभिः अनुसृतो भवति । अर्थात् अक्षराणां पदानां च नियता विन्यासरीतिः भवति । एषा रीतिः एव **छन्दः** इत्युच्यते । छन्दसः **वृत्तम्** इति नामान्तरम् ।

छन्दश्शास्त्रस्य प्रवक्ता भगवान् पिङ्गलाचार्यः । छन्दसि भेदद्वयमस्ति ।

**१. मात्राछन्दः** **२. अक्षरच्छन्दः**

१. **मात्राछन्दः -** स्वरेषु ह्रस्वः, दीर्घः इति भेदः प्रसिद्धः एव । ह्रस्वाक्षरस्य एका मात्रा । दीर्घाक्षरस्य मात्राद्वयम् । मात्रा नाम अक्षरोच्चारणकालः। यदा नियतां मात्राम् अवलम्ब्य श्लोकः विरच्यते, तत्र मात्राछन्दः इति व्यवहारः।

२. **अक्षरच्छन्दः** - यदा नियतानि अक्षराणि अवलम्ब्य श्लोकः विरच्यते तदा अक्षरच्छन्दः इति व्यवहारः । विशेषपारिभाषिकपदानि ज्ञेयानि ।

छन्दोबद्धः पादात्मकः पदसमुदायः पद्यम् । छन्दोरहितः, पादरहितः, पदसमुदायः गद्यम् । यस्मिन् काव्ये गद्यपद्ययोः मिश्रणं भवति, तत् काव्यं चम्पूः इति कथ्यते।

**पादः** -श्लोकस्य चतुर्षु भागेषु एकः भागः पादः ($\frac{१}{४}$) इति, चरणम् इति वा कथ्यते।

**लघु** -संयुक्ताक्षरस्य पूर्वम् अविद्यमानः ह्रस्वस्वरः, ह्रस्वस्वरयुक्तः वर्णो वा लघु। लघु चिह्नम् - ⏑ , अ, इ, उ, ऋ, क, कि एते वर्णाः ।

यथा- ⏑⏑⏑⏑ । ⏑⏑⏑ । ⏑⏑⏑⏑ । ⏑⏑⏑ ।

विलसति । चिनुहि । कथयतु । लिखति ।

©KTBS Not to be republished

उदाहरणेषु ह्रस्वाक्षराणि संयुक्ताक्षरात् पूर्वं न सन्ति । अतः लघुचिह्नम् (∪) प्राप्नुवन्ति ।

**गुरुः** - संयुक्ताक्षरपूर्ववर्णः, दीर्घस्वरः, दीर्घस्वरयुक्तः व्यञ्जनवर्णः, अनुस्वारयुक्तवर्णः, विसर्गयुक्तवर्णः, पादस्य अन्ते विद्यमानः वर्णः ह्रस्ववर्णोऽपि गुरुः भवति ।

**गुरुचिह्नम्** - -

-∪ - -- | --∪ -- | ∪- ∪∪∪- -- | - -∪ ∪ - |

लक्ष्मणं वन्दे । रामाय नमः । गुरुं, गणपतिं वन्दे । नः पातु शिवः ।

**गणः** अक्षरत्रयस्य समूहः गणः । लघूनां गुरूणां च अक्षरणां विन्यासक्रमेण अष्टगणाः भवन्ति ।

यगणः = ∪ - - (आदिलघुः) रमेशः

रगणः = - ∪ - (मध्यलघुः) जानकी

तगणः = - - ∪ (अन्त्यलघुः)जानाति

भगणः = - ∪ ∪ (आदिगुरुः) पालय

जगणः = ∪ - ∪ (मध्यगुरुः) करोति

सगणः = ∪∪ - (अन्त्यगुरुः) हरिणा

मगणः = - - - (सर्वगुरुः) देवेभ्यः

नगणः = ∪∪∪ (सर्वलघुः) चलति

गणानां विन्यासवैचित्र्येण बहूनि वृत्तानि भवन्ति । दशमकक्ष्यायां तेषां परिचयः भविष्यति ।

*****

©KTBS
Not to be republished

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. छन्दश्शास्त्रस्य प्रवक्ता कः ?

२. छन्दसः भेदौ कौ ?

३. गुरु अक्षराणि कानि ?

४. कति गणाः सन्ति ?

२. **द्वित्रैः वाक्यैः उत्तरं लिखत ।**

१. पद्यं, गद्यं, चम्पूः एतेषां लक्षणं विवृणुत ।

२. कानि अक्षराणि गुरु चिह्नं प्राप्नुवन्ति ?

## क्रियाकलापः

**अधस्तनपद्यचरणानां प्रस्तारं विलिख्य गणविभागं कुर्वन्तु ।**

१. भक्तिप्रियाय भवरोगभयापहाय ।

२. भृगुपतिमिदमूचे प्रश्रितं रामभद्रम् ।

३. कामार्ता हि प्रकृतिकृपणाः चेतनाचेतनेषु ।

४. किं किं न साधयति कल्पलतेव विद्या ।

©KTBS Not to be republished

# षोडशः पाठः

# कवेरकन्या

गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते । संस्कृतवाङ्मये बहूनि प्रसिद्धानि चम्पूकाव्यानि सन्ति । तेषु विश्वगुणादर्शचम्पूः अपि अन्यतमा । तत्र श्रीरङ्गे समुद्रेण सह सङ्गच्छन्त्याः कावेरीनद्याः वर्णनं कविकृतं सङ्गृह्य अत्र प्रदत्तम्

१. कृशानुरकृशासूयः पुरोभाविपदं गतः ।
विश्वावसुरभूद्विश्वगुणग्रहणकौतुकी ॥

२. विश्वावसुः कावेरीझरीं सशिरः कम्पम्-

३. अन्तरङ्गपुरसङ्गतमत्राहं तरङ्गचलपङ्कजसङ्घम् ।
सह्यजायतझरं बहु मन्ये स सह्यजायत तमश्शमनार्थम् ॥

४. एष खलु दोषाकुलसकलमनुजकुलसकलकलुषशोषणबद्धकङ्कणा सन्ततमन्तर्गतचिरन्तनपुरुषतल्पीभवदनन्तफणाघृणिक्षेणीशोणीभूततया सरस्वतीम् अनुकुर्वन्ती सरस्वत्याभिमुख्येन कवेरात्मजेति प्रसिद्धिं सार्थयन्ती शान्तनवास्पदतया गाङ्गेयतरङ्गिणीति संज्ञामनुवर्तयन्ती संमज्ञनदुरितहरापि नमज्ञनदुरितहरा निराकृतपथिकश्रान्तिः स्रवन्तीयं कन्दलयति चक्षुषोरमन्दमानन्दम्।

५. पुनः सश्लाघम्-

६. स्वर्णवन्तं विदुः कान्तं रामां हेमापगामिमाम् ।
दाम्पत्यमनयोरेतदनुरूपं विशोभते ॥

७. कृशानुः साक्षेपम्-

८.परिशोभिताम्रपार्श्वा मध्यमहितरङ्गराजतः स्फुरिता ।
कथमिव दधाति कीर्तिं कावेरी कनकनिम्नगेत्येषा ॥

©KTBS Not to be republished

९. विश्वावसु : -

१०. आपातदूषणमिदं निरूप्यमाणमस्याः गुण एव स्यात् पश्य तावदेतस्याः रामणीयकम्-

> ११. पीताम्बरालङ्कृतमध्यभागा कल्हारमालाकमनीयवेणी ।
> सह्याद्रिकन्या जनकस्य गेहात् पत्युस्समीपं व्रजति प्रसन्ना ।।

## तात्पर्यम्

१. कृशानुनामा गन्धर्वः विश्वस्य दोषान् एव पश्यन् स्थितः । विश्वावसुनामको गन्धर्वः विश्वस्य गुणग्रहणशीलः अभूत् ।

२. विश्वावसुः कावेरीप्रवाहं दृष्ट्वा स्वमस्तकं कम्पयन् आह ।

३. अत्र श्रीरङ्गनाथक्षेत्रेण सम्मिलितं, तरङ्गैः सञ्चलितकमलसमूहेन युक्तं, सह्याद्रिपर्वते उत्पन्नं प्रवाहम् अहम् अतिशयेन मानयामि । एषः कावेरीप्रवाहः अज्ञानस्य पापस्य वा विनाशाया प्रकटीबभूव ।

४. इयं कावेरीनदी पापव्याप्तनिखिलमनुष्यवृन्दानां सकलपातकानां नाशने कृतनिश्चया, सततम् अन्तर्निहितस्य श्रीरङ्गनाथाख्यास्य देवस्य शयनरूपिणः अनन्तस्य फणामणीनां किरणैः रक्तीभूतत्वेन सरस्वतीनाम्नीं नदीम् अनुकुर्वती, सरस्वत्याः वेदशास्त्रवाण्याः आभिमुख्येन अथवा सरस्वति समुद्रे आभिमुख्येन वा, कवेरकन्येति पण्डितस्य आत्मजा अथवा कवेरस्य सह्याद्रेः कन्या इति वा ख्यातिं यथार्थीकुर्वती, भीष्मस्य अथवा शमयुक्तस्तुतीनां वा स्थानतया योग्यतया च भीष्मजननी गङ्गेतिनाम अर्थयुतं कुर्वती, स्नानमात्रेण पापहरा, नमस्कुर्वतां जनानां दुरितहरा च पथिकानां श्रमहारिणी कावेरीनदी नेत्रयोः बहुलम् आनन्दम् उत्पादयति।

©KTBS Not to be republished

५. मुहुः श्लाघनं कुर्वन्

६. समुद्रं पतिं सुवर्णनदीं कावेरीं पत्नीम् इति जनाः जानन्ति । अनयोः दाम्पत्यम् अनुरूपं शोभते ।

७. पार्श्वयोः स्थितैः रसालपादपैः विराजिता मध्यभागे पूज्येन श्रीरङ्गराजेन शोभिता एषा कावरी सुवर्णनदी इतिकीर्तिं कथं धरति? (व्यर्थेति भावः)

९. विश्वावसुः गुणग्राही ।

१०. यद्दूषणम् अतात्त्विकं त्वया कृतं तत् अस्याः कावेर्याः गुणः एव भवति। तस्मात् एतस्याः रमणीयत्वं पश्य ।

११. विष्णुना अलङ्कृतमध्यभागा रक्तकमलानां मालया सुन्दरकेशपाशयुता, इयं सह्याद्रिकन्या कावेरी जनकस्य सह्याद्रि पर्वतस्य गृहात् भर्तुः समुद्रस्य समीपं व्रजति ।

**धीराः तरन्त्यापदः**

**प्रारभ्यते न खलु विघ्नभयेन नीचैः**
**प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः**
**प्रारब्धमुत्तमजनाः न परित्यजन्ति ॥**

©KTBS Not to be republished

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. कः विश्वस्य गुणग्रहणशीलः अभूत् ?

२. कवेरात्मजा का?

३. कावेरीप्रवाहः किमर्थं प्रकटीबभूव ?

४. कयोः दाम्पत्यम् अनुरूपं विशोभते ?

५. कावेरी केनालङ्कृतामध्यभागा ?

२. **रिक्तस्थानानि पूरयत ।**

१. ..................काव्यं चम्पूरित्यभिधीयते ।

२. स्वर्णवन्तं ................. विदुः ।

३. कृशानुरकृशासूयः................. गतः ।

४. ..................जायतझरं बहु मन्ये ।

५. ..................जनकस्य गेहात् पत्युसमीपं व्रजति ।

३. **संयोज्य लिखत ।**

| | |
|---|---|
| १. विश्ववसु | गङ्गा । |
| २. कवेरकन्या | कमनीयवेणी । |
| ३. भीष्मजननी | विश्वगुणग्रहणकौतुकी । |
| ४. पथिकानां | कावेरी । |
| ५. कलहारमाला | श्रमहारिणी । |

४. **लकारपुरुषवचानानि लिखत ।**

१. सन्ति २.अभूत् ३. विशोभते ४. स्यात्

५. **कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

१. कावेरी नद्याः वर्णनं कुरुत ।

©KTBS Not to be republished

## सप्तदशः पाठः

# परोपकारः कर्तव्यः



**कविकाव्यपरिचयः**

**कविः** - श्रीहर्षः । अयं महावीरः महाराजः कविश्च आसीत् ।

**देशः** - स्थाणेश्वरः ।

**कालः** - कि.श. ५७० तः ६४७ ।

**ग्रन्थः** - रत्नावली, प्रियदर्शिका, नागानन्दं च ।

**प्रशंसा** - "वाचो न पर्याप्तो भवति" इति कविः बाणभट्टः श्रीहर्षं प्रशंसति । अयं बाणभट्टः श्रीहर्षस्य आस्थाने आसीत् ।

**कथासारः** - विद्याधराणां चक्रवर्ती जीमूतकेतुः । जीमूतवाहनः तस्य पुत्रः । मलयवती जीमूतवाहनस्य सहधर्मिणी । तस्य पितरौ मुनिवृत्तिम् आश्रितवन्तौ । तयोः सेवा मया कर्तव्या इति तस्य सङ्कल्पः ।

©KTBS Not to be republished

एकदा सः देवरेण मित्रावसुना सह समुद्रतीरे विहरति स्म । तत्र पर्वताकारेण स्थितम् अस्थिराशिम् अपश्यत् । गरुडेन भक्षितानां सर्पाणां अस्थीनि तत्र आसन् । तद्दृष्ट्वा जीमूतवाहनस्य हृदयम् अद्रवत् । स्वशरीरदानेन यस्य कस्यापि नागस्य रक्षणं कार्यम् इति सङ्कल्पम् अकरोत् ।

कस्मिंश्चित् दिने शङ्खचूडो नाम नागः गरुडस्य बलिः इति निश्चितः । जीमूतवाहनः तं रक्षितुं स्वयमेव गरुडबलिः भवितुं निर्णयम् अकरोत् । सः गरुडं प्रति आत्मार्पणाय गच्छति ।

तदनन्तरं शङ्खचूडेन सह जीमूतवानस्य पितरौ भार्या च वध्यस्थानं आगच्छन्ति। अत्र ततः कथा आरभते ।

## पात्रवर्गः

१. जीमूतकेतुः - वृद्धविद्याधरचक्रवर्ती ।
२. वृद्धा - जीमूतकेतोः पत्नी ।
३. जीमूतवाहनः- कथानायकः ।
४. मलयवती - सिद्धराजकुमारी, नायकस्य पत्नी ।
५. शङ्खचूडः- नागकुमारः ।
६. गरुडः- पक्षिराजः ।
७. गौरी - विद्याधरदेवता ।

**[ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः]**

जीमूतकेतुः - (सहर्षम्) देवि ! मत्पुत्रः न मृतः । परन्तु गरुडेन सेव्यमानः तिष्ठति। वृद्धे ! कृतार्थोऽस्मि वत्स! मां आलिङ्गय ।

**(नायकः उत्थातुम् इच्छति। किन्तु पतितोत्तरीयः मूर्छति)**

मलयवती - हा ! आर्यपुत्र ! ईदृशम् आर्यपुत्रं प्रेक्षमाणा अहं अद्यापि जीवितं न परित्यजामि ।

©KTBS Not to be republished

वृद्धा - (नायकस्य अङ्गानि स्पृशति) नृशंस! कथमिदानीम् त्वया मे पुत्रकस्य अभिनवयौवनशोभाशरीरमेतदवस्थं कृतम् ।

नायकः - अम्ब! मा मैवम्। किमनेन कृतम् ? सदा बीभत्सदर्शने शरीरे का शोभा ?

गरुडः - भो महात्मन् ! अहं पश्चात्तापपीडितः । तदुपदिश्यतां येन मुच्येदहमस्मादेनसः ?

नायकः - वैनतेय ! श्रूयताम् ।

गरुडः (जानुभ्यां स्थित्वा, कृताञ्जलिः) आज्ञापय ।

नायकः - नित्यं प्राणाभिघातात् विरम । प्राक् कृते च अनुतापं कुरु । सर्वजन्तुषु अभीतिं दिशन् पुण्यप्रवाहं समुपचिनु ।

गरुडः - यदाज्ञापयति । सर्वप्राणिवधादेषः विरतोऽद्यप्रभृत्यहम् ।

नायकः - साधु, महासत्व! साधु ! अनुमोदामहे । शङ्खचूड! समानय मे हस्तौ।

शङ्खचूडः - (तथा कुर्वन्) कष्टम् । अनार्यं कृतं जगत् ।

नायकः - (अर्धोन्मीलितचक्षुः पितरं पश्यन्) तात! अम्ब! अयं मे पश्चिमप्रणामः। विवशस्य ममासवो यान्ति । अथवा किमनेन प्रलपितेन ? संरक्षता पन्नगमद्य पुण्यं मयार्जितं, भूयान् परोपकाराय शरीरलाभः खलु ।

©KTBS Not to be republished

(नायकः एवम् उक्त्वा पतति)

जीमूतकेतुः - हा वत्स ! जीमूतवाहन! हा सर्वगुणनिधे! क्वासि? देहि मे प्रतिवचनम्।

मलयवती - हा अर्यपुत्र ! कथं परित्यज्य गतोऽसि ।

गरुडः - (सोद्वेगम् ) कष्ठम् । उपरतोऽयं महात्मा । किमिदानीं करोमि?

वृद्धा - भगवन्तो लोकपालाः ! कथमप्यमृतेन सिक्त्वा पुत्रकं जीवयत ।

गरुडः - (सहर्षमात्मगतम्) अये ! अमृतसङ्कीर्तनात् साधु स्मृतम्। अमृतवर्षेण न केवलं जीमूतवाहनं पूर्वभक्षितान् सर्वान् आशीविषान् प्रत्युज्ञीवयामि।

(निष्क्रान्तः)

मलयवती - (बद्धाञ्जलिः) भगवति गौरि ! त्वया आज्ञाप्तम् यथा विद्याधरचक्रवर्ती ते भर्ता भविष्यति इति । तत् कथं त्वमप्यलीकवादिनी संवृत्ता ?

(सर्वे प्राणत्यागं कर्तुं सिद्धाः भवन्ति । ततः प्रविशति ससम्भ्रमा गौरी ।)

गौरी - महाराज ! जीमूतकेतो ! न खलु न खलु साहसम् अनुष्ठातव्यम्।

जीमूतकेतुः - कथममोघदर्शना गौरी !

©KTBS Not to be republished



गौरी - (मलयवतीमुद्दिश्य) वत्से ! कथमहमलीकवादिनी भवेयम् ।

(नायकमुपसृत्य कमण्डलुजलेन अभ्युक्षन्ती )

परितुष्टास्मि ते वत्स जीव जीमूतवहन ।

नायकः - उत्तिष्ठति ।

**(सर्वे गौरीं नमन्ति)**

जीमूतकेतुः - कथममृतवृष्टिः। भगवति! किमेतत् ?

गौरी - राजन् ! समुपजातपश्चात्तापेन पक्षिपतिना गरुडेन देवलोकात् इयं अमृतवृष्टिः पातिता । (नायकमुद्दिश्य) वत्स । जीमूतवाहन ! त्वामहं विद्याधरचक्रवर्तिनं करोमि । तद्वत्स ! किं ते भूयः प्रियमुपकरोमि ।

©KTBS Not to be republished

नायकः - (जानुभ्यां स्थित्वा) देवि ! वैनतेयः त्रातः। सोऽपि विनीतः। अमृतसेचनेन पन्नगाः जीविताः। त्वं साक्षात् दृष्टा । अतः परं किं त्वयि प्रार्थ्यते ? तथापीदमस्तु ।

**(भरतवाक्यम्)**

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।

दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः।।

*****

©KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. जिमूतवाहनः कः ?

२. वैनतेयः कः ?

३. शङ्खचूडः कस्य हस्तौ समानयति ?

४. जीमूतवाहनः समुद्रतीरे किम् अपश्यत् ?

५. अमृतवृष्टिः कस्मात् पातिता ?

**२. यथानिर्देशम् उत्तरं लिखत ।**

१. सदा बीभत्सदर्शने शरीरे का शोभा ?

क: पाठ: ? क: अवदत् ? काम् अवदत् ?

२. विरतोऽद्यप्रभृत्यहम् ।

क: पाठ: ? विरत: क: ? कं वदति ?

३. परितुष्टास्मि ते वत्स ।

क: पाठ: ? कं वदति ? कां वदति ?

**३. सन्धिं विभज्य नाम लिखत ।**

१. ममैव २.क्वासि ३. वधादेष: ४. परितुष्टास्मि

**४. संयोज्य लिखत ।**

| अ | आ |
|---|---|
| जीमूतकेतु: | पक्षिराज: |
| गरुड: | नाग: |
| शङ्खचूड: | देवता |
| मलयवती | विद्याधरचक्रवर्ती |
| गौरी | सिद्धराजकुमारी |

**५. चतुर्थपदं लिखत ।**

१. शङ्खचूड: नाग: ; गरुड:................ ।

२. गौरी विद्याधरदेवता ; मलयवती: .................. ।

©KTBS Not to be republished

३. जीमूतकेतुः वृद्धा ; जीमूतवाहनः .................. ।

६. **द्वित्रैः वाक्यैः उत्तरं लिखत ।**

१. विनीतं गरुडं प्रति नायकः किमुपदिशति ?

२. बद्धाञ्जली मलयवती गौरीं किं प्रार्थयति ?

७. **विजातीयपदं लिखत ।**

१. नायकः, गरुडः, जीमूतकेतुः, वृद्धा ।

२. मलयवती, जीमूतकेतुः, गौरी, वृद्धा ।

३. पुत्रः, कृतः, मृतः, जातः ।

४. उपरतः, जातः, गतः, भरतः ।

८. **कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

१. गरुडस्य हृदयपरिवर्तनं कथम् अभवत् ?

२. जीमूतवाहनस्य दयाशीलतां वर्णयत ।

## क्रियाकलापः

**आकरग्रन्थः** - परोपकारः कर्तव्यः इत्ययं पाठः श्रीहर्षविरचितस्य नागानन्दनाटकस्य पञ्चमाङ्कात् उद्धृतः ।

**नाटकम्** - काव्येषु नाटकं रम्यम् इत्युक्तिः नाटकं प्रशंसति । सर्वाः

©KTBS Not to be republished

ललितकलाः नाटके सङ्गताः इति महत्त्वं दर्शयति । नाट्यं भिन्नरुचेः जनस्य बहुधाप्येकं समाराधनम् इति कालिदासः गायति नाटकस्य माधुर्यम् ।

श्रीहर्षस्य शैली सरला भवति, तथापि गाम्भीर्यादिगुणाः विलसन्ति । अत्र कथावस्तुनः चयनं, पात्रपोषणं, रसाभिव्यक्तिः तात्त्विकनिरूपणं, दार्शनिकता इत्यादिगुणैः सम्मिलितं नाटकमिदं सहृदयानां हृदयकवाटम् उद्घाटयति ।

अस्मिन् भागे नायकः जीमूतवाहनः परहिते एव स्वहितं साधितवान् । परोपकारस्य महत्वं अत्र दरीदृश्यते ।

©KTBS Not to be republished

## अष्टादशः पाठः

# पत्राणि

स्वाभिप्रायं निवेदयितुं पत्रलेखनम् अन्यतमं साधनम् । जीवने पत्रलेखनस्य महत्वं वयं जानीम एव । प्रमुखकार्यसिद्धये इदं सहायकं भवति। पारिवारिकवृत्तान्तस्य आदानप्रदानाय, निमन्त्रणदानाय, शुभकामनादिसन्देशप्रेषणाय च विविधकार्यालयेषु उद्योगप्राप्त्यादि-प्रयोजनानि उद्दिश्य वयं पत्रव्यवहारं कुर्मः।

**पत्रलेखनं द्विविधं भवति।**

**१. वैयक्तिकम्    २. व्यावहारिकम्**

छात्राणां पत्रलेखनकौशलसिद्ध्यर्थं कानिचन पत्राणि प्रदत्तानि। अमुं क्रमम् अनुसृत्य अन्यविषये पत्रं लिखन्तु। पत्रलेखनसमये एते अंशा अनुसरणीयाः।

१. शीर्षिका (शिरोलेखनम्) ।

२. सम्बोधनम्।

३. विषयः (विवरणं च) ।

४. समाप्तिः (उपसंहारः) ।

५. हस्ताङ्कनम् (स्थानदिनाङ्कसहितम्) ।

६. पत्रसङ्केतः।

**अवगच्छत**

वैयक्तिकपत्रलेखनक्रमः अन्यः। व्यावहारिकपत्रलेखनक्रमः अन्यः। द्वयोरपिपरिचयः अत्र कार्यते।

©KTBS Not to be republished

## विरामपत्रम्

सकाशात्-
सुरेशः/निर्मला,
नवमकक्ष्या,
राष्ट्रियप्रौढशाला,
निट्टूरु।

सविधे -
मुख्योपाध्यायः
राष्ट्रियप्रौढशाला,
निट्टूरु ।

मान्याः,

विषयः विरामं प्राप्तुम् ।

मम गृहे अनुजस्य जन्मदिनोत्सवः अस्ति। अहं जन्मदिनोत्सवनिमित्तम् २२-१०-२०१७ तः २३-१०-२०१७ पर्यन्तं शालाम् आगन्तुं न शक्नोमि। अतः दिनद्वयस्य विरामं ददतु इति प्रार्थना।

दिनाङ्कः - २०-१०-२०१७ विधेयः छात्रः/विधेया छात्रा
स्थानम् - निट्टूरु सुरेशः/निर्मला

©KTBS Not to be republished

## वैयक्तिकपत्रम् - १

## पितरं प्रति पुत्रस्य/पुत्र्याः पत्रम्

श्रीः

कुशलम्

विद्यानगरम्
शिरसि
०२-०१-२०१७

परमपूज्यानां पितृचरणानां पादयोः साष्टाङ्गप्रणामाः। अत्र अहं कुशली /कुशलिनी। तत्रापि भवन्तः सर्वे कुशलिनः इति मन्ये।

मम अध्ययनविषये चिन्ता मास्तु। गृहस्य स्मरणं सदा भवति। मातरं प्रति मम साष्टाङ्गप्रणामाः। अनुजाय मम शुभाशीर्वादाः। पत्रं लिखन्तु।

भवदीयः/या पुत्रः/त्री
मनुः/मनीषा

पत्रसङ्केतः

सविधे
श्री कल्याणकुमारः
गृहसंस्या १२३, ५ उपमार्गः,
विजयनगरम्,
मैसूरु।

सकाशात्
मनुः/मनीषा
प्रकोष्ठसंख्या - १५,
सर्वकारीयछात्रावासः,
विद्यानगरम्,
शिरसि उ.क.।

©KTBS Not to be republished

## व्यावहारिकपत्रम्

**पत्रिकासम्पादकं प्रति ग्राहकतायै पत्रम्।**

**सकाशात् -**

**विद्याधरकुमारः**
**"स्वप्नसौधः" गृहसंख्या -३६**
**चतुर्थमुख्यमार्गः, कैलासपुरी, धारवाड**

**सविधे -**

**मान्यः सम्पादकः**
**"सम्भाषणसन्देशः" मासपत्रिका**
**संस्कृतभारती "अक्षरम्"**
**गिरिनगरम् - बेंगलूरु-८५**

विषयः - "सम्भाषणसन्देशपत्रिकायाः ग्राहकतायै निवेदनम्।"

मान्याः,

अहं संस्कृतभारत्या प्रकाश्यमानायाः "सम्भाषणसन्देश" इति मासपत्रिकायाः ग्राहकः भवितुम् इच्छामि। अतः भवन्तः कृपया मम सङ्केतं प्रति प्रेषयन्तु इति प्रार्थयामि। धनादेशद्वारा धनं प्रेषयामि।

धन्यवादाः
पत्रसङ्केतः

स्थानम् - धारवाड — भवदीयः
दिनाङ्कः - ५-२-२०१७ — विद्याधरकुमारः
हस्ताङ्कनम्

अभ्यासं कुर्वन्तु -
१. विरामसमये भवतः गृहम् आगन्तुं मित्रं प्रति पत्रम्।
२. प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रम् ।
३. पुस्तकप्रकाशकं प्रति पुस्तकक्रयणार्थम् पत्रम्।
४. विरामं सम्प्रार्थ्य कक्षाध्यापकं प्रति पत्रम्।

©KTBS Not to be republished

# नवदशः पाठः

## प्रबन्धाः

सरलैः सुन्दरैः शब्दैः निर्दिष्टं विषयम् अधिकृत्य व्यवस्थितरूपेण रचितः वाक्यसमूहः एव प्रबन्धः। प्रबन्धरचनायाः पूर्वं दत्तविषयमधिकृत्य सम्यक् चिन्तनीयम्। प्रबन्धे सामान्यतः प्रस्तावना, विषयविवरणम्, उपसंहारः इति त्रयः भागाः भवन्ति। भाषायाः शैली सरला मधुरा च भवेत्। अत्र केचन प्रबन्धाः दीयन्ते। तं क्रमम् अनुसृत्य अन्ये प्रबन्धाः संक्षेपेण लेखनीयाः।

### १. स्वातन्त्र्योत्सवः

भारतदेशे अनेके उत्सवाः समनुष्ठीयन्ते। उत्सवेषु प्रकारद्वयमस्ति। ते च राष्ट्रियाः धार्मिकाश्च। राष्ट्रियोत्सवेषु "स्वातन्त्र्योत्सवः" अपि अन्यतमः।

अस्माकं राष्ट्रं भारतं क्रि.श. १९४७ तमे वर्षे आगस्ट् मासस्य पञ्चदशदिनाङ्के आङ्ग्लशासनात् विमोचनं प्राप्य स्वतन्त्रम् अभवत्। अस्य स्वातन्त्र्यदिनस्य स्मरणार्थं वयं प्रतिवर्षम् आगस्ट् मासस्य पञ्चदशदिनाङ्के एनम् उत्सवं वैभवेन सश्रद्धम् आचरामः।

अस्मिन् दिने देशे सर्वत्र, विविधकार्यालयेषु शालासु, महाविद्यालयेषु, प्रातः एव राष्ट्रियत्रिवर्णध्वजस्य आरोहणं कृत्वा राष्ट्रगीतस्य गायनेन राष्ट्रं प्रति भक्तिं गौरवं च प्रदर्शयन्ति। अस्मिन् कार्यक्रमे समस्तभारतीयाः, विविधक्षेत्रस्य उद्योगिनः, छात्राः, अध्यापकाः, अधिकारिणः, जनप्रतिनिधयः भागं वहन्ति। स्वातन्त्र्ययुद्धे ये देशभक्ताः प्राणार्पणं कृतवन्तः, ये च नेतारः क्लेशम् अनुभूतवन्तः, तेषां स्मरणं, स्तुतिं च कुर्वन्ति। स्वातन्त्र्यवीराणां चरितं भाषणद्वारा आकाशवाणी, दूरदर्शनं पत्रिकाद्वारा च प्रसारयन्ति।

Not to be republished ©KTBS

इदानीं स्वतन्त्रभारतस्य प्रगतिः अस्माभिः करणीया। भारतस्य कीर्तिः प्रसारणीया। तदा एव अस्माकं जीवनं धन्यं भविष्यति।

वन्दे भारतमातरम्

## २. दूरदर्शनम्

मनुष्यः समाजम् उपजीवति। अतः तस्य परस्परं सम्पर्कः अनिवार्यो भवति। तदर्थम् अद्यतनकाले दूरदर्शनं, वार्तापत्रिकाः, आकाशवाणी, चलच्चित्राणि, ध्वनिमुद्रिका, सङ्गणकयन्त्रं, दूरभाषाः इत्यादयः सम्पर्कमाध्यमाः विद्यन्ते। तथापि सम्पर्कमाध्यमेषु दूरदर्शनमेव जनान् विशेषेण आकर्षति। एतत् बहुजनप्रियं प्रधानं संपर्कसाधनमस्ति।

अस्य दूरदर्शनस्य संशोधकः जे.एल्.बोर्ड महोदयः। अद्यत्वे उपग्रहाणां साहाय्येन दूरदर्शनप्रसारजालं विश्वव्यापकं जातम्। सामान्याः जनाः अपि स्वगृहे एव उपविश्य राज्यस्य, राष्ट्रस्य, अन्ताराष्ट्रस्य वा वार्तां घटनाश्च श्रोतुं द्रष्टुं च शक्नुवन्ति। दूरदर्शने बालकानां, महिलानां, छात्राणां, कर्मकराणां, युवकानां, वृद्धानां च कृते अनेके कार्यक्रमाः प्रसार्यन्ते। केचन कार्यक्रमाः प्रादेशिकभाषयापि भवन्ति। केचन आङ्ग्ल-संस्कृत-हिन्दी इत्यादिभाषया भवन्ति। अनेकस्तरवार्ताः, धारावाहिककार्यक्रमाः, सङ्गीतं, विज्ञानसम्बधिकार्यक्रमाः, आध्यात्मिकाः, स्वास्थ्यसम्बन्धिकार्यक्रमाः, चलच्चित्राणि च प्रसार्यन्ते।

कदाचित् दूरदर्शने प्रसार्यमाणाः श्रृङ्गारप्रचुराः, हिंसाबहुलाश्च कार्यक्रमाः मुग्धबालकानां मनसि दुष्परिणामं जनयन्ति। तेन छात्राणाम् अध्ययनं कुण्ठितं भवति। तथापि राष्ट्रियभावैक्यं साधयितुं, मनोरञ्जनार्थं, बुद्धिविकासार्थं च दूरदर्शनं सहकरोति इत्यत्र नास्ति संशयः।

©KTBS Not to be republished

## ३. गणेशोत्सवः

भारतीयाः उत्सवप्रियाः। एते प्रतिवर्षं अनेकान् धार्मिकान् राष्ट्रियान् च उत्सवान् आचरन्ति। स्वातन्त्र्योत्सवः, गणराज्योत्सवः इत्यादयः राष्ट्रियाः उत्सवाः। रामनवमी, क्रिस्मस्, ओणम्, मोहरम्, नवरात्रम्, दीपावलिः, गणेशोत्सवः इत्येते धार्मिकाः उत्सवाः। तेषु गणेशोत्सवः अन्यतमः।

अयं गणेशोत्सवः प्रतिवर्षं भाद्रपदमासस्य शुक्लपक्षस्य चतुर्थ्यां समाचर्यते। अयं गणेशः शिवपार्वत्योः सुतः, विघ्नानां निवारकः, विद्याधिदेवता च। अतः विघ्ननिवारणाय, विद्याप्राप्त्यर्थं तं समभ्यर्च्य मोदकान् निवेदयन्ति। विद्यालयेषु छात्राः विद्यागणपतिं संस्थाप्य अर्चयन्ति। सामूहिकगणेशोत्सवाः भवन्ति। तत्र सांस्कृतिककार्यक्रमाः धार्मिककार्यक्रमाश्च आयोज्यन्ते।

श्रीबालगङ्गाधरतिलकमहोदयः जनमानसे राष्ट्रियैकताजागरणार्थम् एनम् उत्सवं सार्वजनिकोत्सवरूपेण उद्घोषितवान्।

©KTBS Not to be republished

# विंशः पाठः

## अनुवादः

**❖ कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।**

१. छात्राः क्रीडाङ्गणे क्रीडन्ति । अहमपि क्रीडामि ।

२. कमला प्रतिदिनं संस्कृतं पठति । दूरदर्शने संस्कृतवार्तां पश्यति।

३. वयं परोपकारं करिष्यामः । तेन पुण्यं प्राप्स्यामः।

४. शालायां गणेशोत्सवम् आचरिष्यन्ति । छात्राः श्लोकं गायन्ति ।

५. आम्रवृक्षात् फलानि अपतन् । अहम् एकम् अखादम् ।

६. महिला गीतम् अगायत् । जनाः करताडनम् अकुर्वन् ।

७. सर्वे छात्राः संस्कृतं पठन्तु । परीक्षायाम् उत्तीर्णाः भवन्तु ।

८. वयं सैनिकाः भवाम । देशं रक्षाम ।

**❖ संस्कृतेन अनुवादं कुरुत ।**

1. ನಾವು ಕಥೆಗಳನ್ನು ಓದುತ್ತೇವೆ. ಅವುಗಳಿಂದ ನೀತಿಯನ್ನು ಕಲಿಯುತ್ತೇವೆ.

   We read stories. We learn moral from those.

2. ಸುರೇಶನು ಮುಂಜಾನೆ ಬೇಗನೆ ಎಳುತ್ತಾನೆ. ನದಿಗೆ ಹೋಗಿ ಈಜುತ್ತಾನೆ.

   Suresh gets up early in the morning. He goes to river and swims.

3. ದೀಪಾ ಹಳ್ಳಿಗೆ ಹೋಗುವಳು. ಅಲ್ಲಿ ಅಜ್ಜಿಯನ್ನು ನೋಡುವಳು.

   Deepa will go to village. There she will see her grand mother.

©KTBS Not to be republished

4. ವಿದ್ಯಾರ್ಥಿಗಳು ಶಾಲೆಯಲ್ಲಿ ವಾರ್ಷಿಕೋತ್ಸವವನ್ನು ಆಚರಿಸುವರು. ಎಲ್ಲರೂ ಸಿಹಿಯನ್ನು ತಿನ್ನುವರು.

Students will celebrate annual day at the school. They all will eat sweets.

5. ಸಂಸ್ಕೃತ ಶಿಕ್ಷಕರು ಶ್ಲೋಕಗಳನ್ನು ಹೇಳಿಕೊಟ್ಟರು. ನಾವು ಅವುಗಳನ್ನು ಹಾಡಿದವು.

Samskrit teacher  taught the verses. We sung them.

6. ಗಣೇಶನು ಅಂಗಡಿಗೆ ಹೋದನು. ಒಂದು ಬಾಳೆಹಣ್ಣನ್ನು ತಂದನು.

Ganesh went to the shop. He bought a banana.

7. ನಾವೆಲ್ಲರೂ ಚೆನ್ನಾಗಿ ಓದೋಣ. ಒಳ್ಳೆಯ ಉದ್ಯೋಗಗಳನ್ನು ಪಡೆಯೋಣ.

We read well. We get good jobs.

8. ನೀನು ಚೆನ್ನಾಗಿ ಆಟವನ್ನು ಆಡು. ಕ್ರೀಡಾಕೂಟದಲ್ಲಿ ಪ್ರಥಮಸ್ಥಾನವನ್ನು ಪಡೆ.

You play well. Get first place in the championship.

©KTBS
Not to be republished

## पूरकपाठः - १

# देवस्तिष्ठति सर्वत्र

अस्माकं कर्नाटके पुरन्दरादयः दासवरेण्याः स्वीयैः अपूर्वैः गीतैः लोकेषु भक्तिं नीतिं च वर्धितवन्तः । परमज्ञानिनः

श्रीव्यासरायस्वामिनः एतेषां हरिदासानां गुरवः मार्गदर्शकाश्च आसन् । तेषु कनकदासः अत्यन्तं प्रसिद्धः । तस्य निश्चला भक्तिः अस्मिन् पाठे प्रदर्शिता ।

पूर्वं श्रीकृष्णदेवरायनामकः प्रख्यातः नृपः विजयनगरसाम्राज्यं पालयतिस्म। तस्मिन् काले महायोगिनः शिष्यवत्सलाः च श्रीव्यासरायस्वामिनः विख्याताः आसन् । तेषां मठे नैके शिष्याः अध्ययनार्थम् आगताः आसन् ।

कदाचित् कागिनेलेनामकात् ग्रामात् कनकः इति कश्चन देवभक्तः स्वामिनां शिष्यत्वं प्राप्तुम् आगतः । कनकः कविः ज्ञानी विनयशीलश्च आसीत् । स्वीयैः श्रेष्ठगुणैः सः शीघ्रमेव व्यासरायस्वामिनां प्रीतिं सम्पादितवान् । अनेन कारणेन

अन्ये शिष्याः कनकविषये असूयापराः अभवन्। तदा आचार्याः कनकस्य श्रेष्ठगुणान् ज्ञानं च प्रकाशयितुम् उपायमेकं चिन्तितवन्तः।

एकदा सर्वान् शिष्यान् आहूय एकैकस्य अपि हस्ते एकैकं कदलीफलं दत्वा 'यत्र न कोऽपि पश्यति तत्र फलम् इदं खादत' इति आज्ञापितवन्तः। सर्वे शिष्याः कदलीफलानि स्वीकृत्य निर्गताः। परेद्यवि आचार्याः शिष्यान् अहूय तैः अनुसृतं कदलीफलखादनविधानं पृष्ठवन्तः। तदा एकः शिष्यः निर्जनप्रदेशे, अपरः मुखोपरि अवगुण्ठनस्थापनेन, अन्यः सायङ्काले वटवृक्षस्य पृष्ठभागे, इतरः कुड्यस्य पार्श्वे च फलं खादितवान् इति ससन्तोषं स्वीयकदलीफलभक्षणक्रमं निवेदितवन्तः।

©KTBS Not to be republished

परं कनकः मौनेन सङ्कोचेन च दूरे स्थितवान्। तस्य हस्ते कदलीफलं तथैव आसीत्। तदवलोक्य व्यासरायस्वामिनः तं समीपम् आहूय वात्सल्येन कदलीफलस्य अखादने कारणं पृष्टवन्तः।

तदा कनकः 'आचार्य! यत्र यत्र पश्यामि तत्र सर्वत्र देवः विलसति। नास्ति तादृशः, एकः अपि प्रदेशः यं देवः न पश्यति। एवं सति अहं कथं कदलीं खादेयम्' इत्युक्त्वा कदलीफलम् आचार्यस्य पुरः निक्षिप्तवान्। तदा परमसन्तुष्टाः आचार्याः कनकेन दर्शितं 'देवस्तिष्ठति सर्वत्र' इति सत्यम् असूयापरान् अन्यान् सम्यक् बोधितवन्तः ।

**अभ्यासः**

१. कनकेन प्रदर्शितं 'देवस्तिष्ठति सर्वत्र' इति विषयं सङ्गृह्य कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।

©KTBS Not to be republished

# पूरकपाठः - २

## कुमार्गस्थो विनश्यति

गद्यकाव्यप्रवेशकथासाहित्यम् अपि अन्यतमम्। कथाः बालानां मनांसि रञ्जयन्ति नीतिं च बोधयन्ति। संस्कृतकथाग्रन्थेषु सोमदेवविरचितः 'कथासरित्सागरः' प्रसिद्धः विशालश्च वर्तते। तस्मात् एका कथा अत्र प्रदत्ता।

पूर्वं विदर्भदेशं वीरवर्मनामकः राजा परिपालयति स्म। तस्य पिता प्रहारवर्मा स्वमरणसन्दर्भे केनचित् तापसेन अनुगृहीतम् अद्भुतम् अङ्गुलीयकं पुत्रस्य हस्ते निधाय 'सत्येन धर्मेण च राज्यं परिपालय। यदि भवान् धर्मभ्रष्टः भवति चेत् इदम् अङ्गुलीयकं तुदति। यदि त्रिवारं अङ्गुलीयकस्य सूचनां भवान् तिरस्करोति चेत् सम्पत् अपगच्छति आपत् च समापतति' इत्युक्त्वा मरणं गतः। पितु; वचनमिदम् अनुदिनं स्मरन् वीरवर्मा धर्मेण राज्यम् पालयन् आसीत्।

एकदा वीरवर्मा विन्ध्यवासिन्याः स्वकुलदेवतायाः दर्शनार्थं गत्वा प्रत्यागमनसमये लुण्ठाकैः अपह्रियमाणां सौदामनीनाम्नीं राजकुमारीं रक्षितवान्। तौ परस्परं अनुरक्तौ भूत्वा ईषत्कालानान्तरं स्वदेशं प्रतिनिवृत्तौ।

गच्छता कालेन दुर्जयनामकः अधर्ममार्गानुसारी कश्चन बन्धुः वीरवर्मणः प्रासादम् आगतः। सः स्वमधुरवचनैः वीरवर्मणः चित्तं वशीकृत्य मद्यपानमृगयाहिंसादिदुष्कर्माणि तं प्रेरितवान्। दुर्जयस्य दुर्वचनेन परिवर्तितः वीरवर्मा ज्येष्ठानां हितवचनानि तिरस्कृत्य स्वच्छन्दतया दुष्कर्मणि प्रवृत्तः। तदा अङ्गुलीयकस्य सूचनां तिरस्कृतवान्।

©KTBS Not to be republished

एवम् अधर्ममार्गवृत्तः वीरवर्मा धनकनकादिलोभेन रत्नखनिसमृद्धम् कान्यकुब्जराज्यम् आक्रान्तवान्। तस्मिन् घोरे युद्धे कान्यकुब्जराजं मारयित्वा क्रूरमृग; इव राजभाण्डागारं विलुण्ठन् हिंसाताण्डवम् एव अकरोत्। तेन बहवः निरपराधिनो जनाः युद्धे मृताः। राज्ञि मृते राज्यरक्षाणाय राजतनया खड्गहस्ता वीरवर्मणः पुरतः योद्धुं समायाता। तां दृष्ट्वा वीरवर्मा क्षणकालं स्तब्धः अभूत्। यतः सा एव सौदामिनी या पूर्वं वीरवर्मणा अनुरक्ता आसीत्। तदा क्रुद्धा गद्गदकण्ठा सौदामिनी तं प्रति 'भोः राजन्! भवान् अधुना प्रजाहितचिन्तकः वीरवर्मा नैव। किञ्च क्रूरः प्रजानाम् अन्तकः द्वितीयः इव प्रतिभाति। पूर्वं क्रूरलुण्ठकेभ्यः संरक्षिता अहम् इदानीं क्रूरतरस्य लुण्ठकस्य भवतः हस्ते निपतिता अस्मि। निरपराधिनां शिशुवृद्धमहिलानां प्रजाजनानां च हनने तव का इष्टार्थसिद्धिः जाता? किं तेषाम् आक्रन्दनं न श्रुणोति? रुधिरधाराधिकं हृदयविद्रावकं दृश्यं दृष्ट्वा किं तव हृदयं नानुकम्पते?' इति सा ललनामणी विलपनम् अकरोत्।

स्वभावतः धर्मबुद्धिः परप्रेरितक्षुद्रबुद्ध्या कुमार्गस्थः वीरवर्मा तस्याः धीरवचनं श्रुत्वा स्वहस्तात् प्रच्युतमपि खड्गं न लक्षितवान्. शिलामूर्तिरिव स्तब्धः अभूत्। तस्य मनसि विवेकोदयः सञ्जातः। स्वापराधं ज्ञात्वा पितुर्वचनं च स्मृत्वा क्षमां याचमानः अङ्गुलीयकं तस्याः अङ्गुल्यां धारितवान्। एवम् एकेन अपि अविवेकेन अनेके अनर्थाः सम्भवन्ति कुमार्गस्थः विनश्यति इति च नीतिं वीरवर्मा सम्यक् अवगतवान्।

## अभ्यासः

१. वीरवर्मणः मनसि कथं विवेकोदयः सञ्जातः इति विषयं सङ्गृह्य कर्णाटकभाषया



©KTBS Not to be republished

# गद्यावगाहनम्

पाण्डवाः द्वैतवने वनवासम् अनुभवति स्म। तदा धर्मराजः कौरवाणां प्रजापालनक्रमं ज्ञातुम् ऐच्छत्। अतः किरातम् एकं हस्तिनापुरं प्रेषितवान्। सः किरात; ब्रह्मचारिवेषं धृत्वा सर्वं वृत्तान्तं ज्ञातवान्। सः ततः प्रत्यागत्य युधिष्ठिरं सर्वं निवेदितवान्।

## अभ्यासः

१. के द्वैतवने वनवासम् अनुभवन्ति स्म?
२. कः कौरवाणां प्रजापालनक्रमं ज्ञातुम् ऐच्छत्?
३. किरातः कं वेषं धृतवान्?
४. धर्मराजः कं हस्तिनापुरं प्रेषितवान्?

भरतखण्डस्य उत्तरदिशि हिमालयः अस्ति। सः नहाधिराजः इति विख्यातः वर्तते। भारतीयानां हृदये हिमालयस्य महत्त्वपूर्णं स्थानं विद्यते। वेदपुराणेषु च अस्य माहात्म्यं वर्ण्यते। अयं शैलः विश्वस्मिन् एव अनुपमः।

## अभ्यासः

१. कस्यां दिशि हिमालयः अस्ति?
२. कः नगाधिराजः इति विख्यात?
३. भारतीयानां हृदये हिमालयस्य कीदृशं स्थानं विद्यते?
४. हिमालयस्य माहात्म्यं केषु वर्ण्यते?

©KTBS Not to be republished

# चित्रकथा

## सूर्योदयः



Not to be republished © SCERT

* उदाहरणवाक्यं पठित्वा मञ्जूषातः पदं चित्वा रिक्तस्थानं पूरयत ।

उदाहरणम् - सूर्योदयः रमणीयः अस्ति ।

१. सूर्यः________________ दिशि उदेति ।

२. प्रातः काले मरीचयः ________________ भवन्ति ।

३. सूर्यकिरणाः________________ मूलं वर्तन्ते ।

४. भानुः, भास्करः, रविः, अर्कः इत्यादयः सूर्यस्य____________।

५. सूर्यं विना ________________ कार्यमेव न प्रचलति।

| |
|---|
| आहारस्य, जगतः, रक्तवर्णे, पूर्वस्यां, नामान्तराणि |

# ग्रामः



* चित्रं दृष्ट्वा वाक्यानि रचयत ।

©KTBS Not to be republished

# आकरग्रन्थाः

१. कथालहरी- श्री एच्. वि नागराजराव् ।

२. श्री भास्करभट्टस्य देवीविलासः।

३. आनेक्लसुब्बरायशास्त्री- तरङ्गः कन्नड साप्ताहिकः(अक्टोबर्-२००४ जून् (२०११),अन्तर्जालम् ।

४. श्रीहर्षकृतम् - नागानन्दनाटकम् ।

५. श्री. नारायणपण्डितस्य - हितोपदेशः ।

६. श्री. जि. महाबलेश्वरभट्टविरचितम्, कारकम्, सन्धयः, समासाः ।

७. श्री. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी ।

८. विष्णुपुराणम् ।

**काव्येषु नाटकं रम्यम्**
**तत्र रम्या शकुन्तला ।**
**तत्रापि च चतुर्थोऽङ्कः**
**तत्र श्लोकचतुष्टयम् ।।**

©KTBS Not to be republished